८६०/६

श्रीः ।

श्रीकालिदास–श्रीभट्टकेदारविरचितौ.

श्रुतबोध–वृत्तरत्नाकरौ ग्रंथौ.

CHECKED 1917
Initial

इमौ सव्याख्यौ

क्षेमराज–श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

(खेतवाडी ७ वीं गली खम्बाटा लेन)

स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्–यन्त्रालये

मुद्रयित्वा प्रकाशितौ ।

आषाढ संवत् १९७१ शके १८३६.

॥ श्रीः ॥

श्रीकालिदास–श्रीभट्टकेदारविरचितौ.

श्रुतबोध–वृत्तरत्नाकरौ ग्रंथौ.

इमौ सव्याख्यौ

खेमराज–श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

खेतवाडी ७ वीं गली खम्बाटा लेन


स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितौ ।

संवत् १९७१. शके १८३६.

॥ श्रीमद्वेंकटेशाय नमः ॥

अथ सटीकः श्रुतबोधः ।



छंदसां लक्षणं येन श्रुतमात्रेण बुध्यते ॥
तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

श्रीमत्सारस्वतं धाम नत्वा स्तुत्वा च सद्गुरुम् ॥ टीका श्रीश्रुतबोधस्य छंदसः क्रियते मया ॥ १ ॥ छन्दसामिति । अहं तं श्रुतबोधं नाम छन्दःशास्त्रं संप्रवक्ष्यामि । कीदृशं तम् । अविस्तरं न विद्यते विस्तरो यस्मिन् सोऽविस्तरस्तमविस्तरम् । येन श्रुतमात्रेण प्रस्तारादि विनैव छंदसामार्यानुष्टुभादीनां लक्षणं गुरुलघुवर्णमात्रागणादिस्वरूपं बुध्यते ज्ञायत इत्यन्वयः ॥ १ ॥

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ॥
विज्ञेयमक्षरं गुरु पादांतस्थं विकल्पेन ॥ २ ॥

अथ छन्दोलक्षणस्य लघुगुरुज्ञानमन्तरेण दुर्विज्ञेयत्वाल्लघुगुरुलक्षणमाह । संयुक्ताद्यमिति । एतादृशमक्षरं गुरु ज्ञेयम् । कीदृशमक्षरम् । संयुक्ताद्यं संयुक्तस्य संयोगीभूतस्याद्यमादिभवम् । पुनः कीदृशम् । दीर्घं द्विमात्रकम् । सानुस्वारमनुस्वारेण सह वर्तमानम् । पुनः विसर्गसंमिश्रं विसर्गेण संमिश्रं विसर्गसहितम् । पादांतस्थमक्षरं विकल्पेन गुरु लघु विज्ञेयम् । पादांते गुरुरपि लघुः स्यात्कुत्रचिल्लघुरपि गुरुः स्यात् । तथा चोक्तं ग्रन्थान्तरे । वा पादांते त्वसौ ज्ञेयो ह्यन्यो मात्रिको लघुः ॥ २ ॥

आदिमध्यावसानेषु भजसा यांति गौरवम् ॥
यरता लाघवं यांति मनौ तु गुरुलाघवम् ॥ ३ ॥

श्लोकादौ कस्मिंश्चिद्गणे पतिते शुभं कस्मिंश्चिद्गणे पतिते चाशुभं भवतीत्यष्टगणानां लक्षणमाह । आदिमध्यावसानेष्विति ॥ भजसाः मगणजगणसगणाः

आदिमध्यावसानेषु गौरवं गुरुतां यांति । आदिश्च मध्यं च अवसानं च तानि तेषु । तथा हि । आदिगुरुर्भगणः मध्यगुरुर्जगणः अन्त्यगुरुः सगणः । यरताः यगणरगणतगणाः आदिमध्यावसानेषु लाघवं लघुतां यांति । तथाहि । आदिलघुर्यगणः मध्यलघूरगणः अन्त्यलघुस्तगणः । पुनः मनौ मगणनगणौ आदिमध्यावसानेषु गुरुलाघवं गुरुतां लघुतां च यातः । तथा च सर्वगुरुर्मगणः सर्वलघुर्नगणः भवतीति । एतेषां देवताः फलानि च ग्रन्थांतरे । मो भूमिः श्रियमातनोति य जलं वृद्धिं र वह्निर्मृतिं सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम् । जः सूर्यो भयमाददाति विपुलं भेंदुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः ॥ ३ ॥

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ॥
अष्टादश द्वितीये चतुर्थके पंचदश सार्या ॥ ४ ॥

यस्याः पाद इति । सा आर्या भवति । सा का यस्याः प्रथमे पादे द्वादश मात्राः स्युः तृतीये तथा द्वादश मात्रा भवंति । द्वितीयेऽष्टादश मात्रा भवंति । चतुर्थके पंचदश मात्रा भवंति सा आर्या ॥ ४ ॥ आर्या । चरणेषु क्रमान्मात्राः—१२, १८, १२, १५ ॥

आर्यापूर्वार्धसमं द्वितीयमपि यत्र भवति हंसगते ॥
छंदोविदस्तदानीं गीतिं तामामृतवाणि भाषंते ॥५॥

आर्यापूर्वार्धसममिति । हे अमृतवाणि छन्दोविदस्तदानीं तां गीतिं भाषंते ब्रुवते । हे हंसगते यत्रार्यापूर्वार्धसमं द्वितीयमपि उत्तरार्धमपि भवति । पूर्वार्धस्य प्रथमे द्वादश मात्रा द्वितीयेऽष्टादश तृतीये द्वादश चतुर्थकेऽष्टादश संकलनया षष्टिमात्रा इत्यर्थः । अमृतमिव वाणी वाक् यस्याः सामृतवाणी तस्याः संबुद्धौ । छन्दांसि विदंति जानंतीति छन्दोविदः छंदःशास्त्रज्ञा इत्यर्थः । हंसस्य गतिर्गमनमिव गमनं यस्याः सा हंसगता तस्याः संबुद्धौ हंसगते इत्यर्थः ॥ ५ ॥ गीतिः । चरणेषु क्रमान्मात्राः—१२, १८, १२, १८ ॥

आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ॥
कामिनि तामुपगीतिं प्रकाशयंते महाकवयः ॥ ६ ॥

आर्योत्तरार्धतुल्यमिति । हे कामिनि महाकवयस्तामुपगीतिं प्रकाशयंते उपगीतिसंज्ञकां प्रकटीकुर्वते इत्यर्थः । यदि आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत्प्रयोगीकृतं चेत् भवति । प्रथमे द्वादश मात्रा द्वितीये पंचदश तृतीये द्वादश चतुर्थे पंचदश संकलनया ५४ चतुष्पंचाशन्मात्रा इत्यर्थः । कामो विद्यते यस्याः सा कामिनी तस्याः संबुद्धौ । महांतश्च ते कवयश्चेति कर्मधारयः । तथा चोक्तं ग्रंथांतरे । आर्याद्वितीयकेर्द्धे यद्दृदितं लक्षणं तत्स्यात् । यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ६ ॥ उपगीतिः । चरणेषु क्रमान्मात्राः १२, १५, १२, १५ ॥

आद्यचतुर्थं पंचमकं चेत् ॥ यत्र गुरुः स्यात्साक्षरपंक्तिः ॥ ७ ॥

अथाक्षरपंक्तिः । आद्यचतुर्थमिति । यत्र यस्यां वृत्तौ आद्यं प्रथमं चतुर्थं पंचमकं गुरु स्यात्साक्षरपंक्तिः ज्ञेया । अक्षरशब्दः पादपूरणार्थः छंदस्तु पंक्तिः प्रतिचरणं इदं लक्षणम् । तथा चोक्तं रत्नाकरे । भोमाविति पंक्तिः ॥ ७ ॥ अक्षरपंक्तिः । चरणाक्षराणि ९ ग० भ, ग, ग ॥

अगुरुचतुष्कं भवति गुरू द्वौ ॥ घनकुचयुग्मे शशिवदनासौ ॥ ८ ॥

अगुर्विति । हे घनकुचयुग्मे यत्राद्यं चतुष्कं वर्णचतुष्टयम् अगुरुस्याद्यास्त्वारो वर्णा लघवः संति ततो द्वौ पंचमषष्ठौ गुरू दीर्घौ भवतस्तदा शशिवदना । चरणचतुष्टये इदं लक्षणम् असाविति संबंधः । घनं कठिनं कुचयुग्मं यस्याः सा घनकुचयुग्मा तस्याः संबुद्धौ । तथा चोक्तं रत्नाकरे । शशिवदना स्यौ ॥ ८ ॥ शशिवदना । चरणाक्ष० ६, ग० न, य ॥

तुर्यं पंचमकं चेद्यत्र स्याल्लघु बाले ॥ विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥

सप्ताक्षरजातौ मदलेखालक्षणमाह । तुर्यमिति । हे मृगनेत्रे यदि तुर्यं चतुर्थं पंचमकं पंचमं लघु स्यात् हे बाले नवयौवने विद्वद्भिः पण्डितैः सा मदलेखा प्रोक्ता । मृगस्य नेत्रे इव नेत्रे यस्याः सा मृगनेत्रा तस्याः संबुद्धौ । उक्तं रत्नाकरे । मसौ गः स्यान्मदलेखा ॥ ९ ॥ मदलेखा । चरणाक्षर ७, ग० म, स, ग ॥

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् ॥
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ १० ॥

अष्टाक्षरजातौ श्लोकलक्षणमाह । श्लोक इति । अन्ययोः प्रथमतृतीयपादयोः सप्तममक्षरं गुरु द्विमात्रकं भवति । सर्वत्र चतुर्ष्वपि चरणेषु पंचमम् अक्षरं लघु स्यात् षष्ठं गुरु स्यात् । द्विचतुष्पादयोः द्वितीयचतुर्थचरणयोः सप्तमम् अक्षरं ह्रस्वं ज्ञेयम् । ईदृग्विधे श्लोके पद्येऽनुष्टुबादयो भवंति ॥ १० ॥

पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ॥
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥ ११ ॥

अथ पद्यलक्षणमाह । पंचममिति । एतत्पद्यस्य लक्षणं विजानीयात् । यत्र सर्वत्र चरणेषु पंचमं लघु भवति । द्विचतुर्थयोः द्वितीयचतुर्थचरणयोः सप्तममक्षरं लघु भवति सर्वत्र चरणेषु षष्ठम् अक्षरं गुरु भवति ॥ ११ ॥ पद्यम् । चरणाक्ष० ८ गणनियमो नात्र ॥

आदिगतं तुर्यगतं पंचमकं चांत्यगतम् ॥
स्याद्गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥ १२ ॥

माणवकाक्रीडलक्षणमाह । आदिगतमिति । तदिदं माणवकाक्रीडं कथितम् । कविभिरित्यध्याहार्यम् । आदिगतं प्रथमं तुर्यगतं चतुर्थं पंचमकं पंचमम् अंत्यगतम् अंत्यस्थितमष्टमं गुरु स्यात्तदिदं माणवकाक्रीडं बुधा विदंति । तथा चोक्तं रत्नाकरे । माणवकं मस्तलगाः ॥ १२ ॥ माणवकम् । चरणाक्ष० ८ ग० म, त, ल, ग ॥

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ॥
तदा निवेदयंति तां बुधा नगस्वरूपिणीम् ॥ १३ ॥

अथ नगस्वरूपिणीलक्षणमाह । द्वितुर्येति । बुधाः पंडिताः तदानीं नगस्वरूपिणीं निवेदयंति । तदा कदा यदा द्वितीयं तुर्यं चतुर्थं षष्ठम् अष्टमम् अक्षरं गुरु प्रयोजितं गुरुसंज्ञकं भवति एतादृशीं तां नगस्वरूपिणीं निवेदयंति । तथाचोक्तं रत्नाकरे । प्रमाणिका जरौ लगौ ॥ १३ ॥ प्रमाणिका, नगस्वरूपिणीति वा । च० अ० ८, ग० ज, र, ल, ग ॥

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ॥
विद्वद्वृंदैर्वीणावाणि व्याख्याता सा विद्युन्माला १४॥

अथ विद्युन्मालालक्षणमाह । सर्वे वर्णा इति । हे वीणावाणि विद्वद्वृन्दैः पंडितसमूहैः सा विद्युन्माला व्याख्याता । वीणायाः वाणीव वाणी यस्याः सा वीणावाणी तस्याः संबुद्धौ । विदुषां पंडितानां वृंदानि समूहास्तैः । सा का यस्यां सर्वे वर्णा दीर्घा गुरुभूता भवंति । वेदैर्वेदैश्चतुर्भिर्विश्रामो भवति सा विद्युन्माला । तथा चोक्तं रत्नाकरे । मो मो गो गो विद्युन्माला ॥ १४ ॥ विद्युन्माला । च० अ० ८, ग० म, म, ग, ग यतिः ४, ४ ॥

तन्वि गुरु स्यादाद्यचतुर्थं पंचमषष्ठं चांत्यमुपांत्यम् ॥ इंद्रियबाणैर्यत्र विरामः सा कथनीया चंपकमाला ॥ १५ ॥

अथ दशाक्षरजातौ चम्पकमालालक्षणमाह । तन्वीति । हे तन्वि तन्वंगि सा चम्पकमाला कथनीया । सा का यत्र यस्याम् आद्यचतुर्थं प्रथमं चतुर्थं पंचमषष्ठम् अत्यं दशमम् उपांत्यं नवमम् एते गुरवो भवंति यत्र इंद्रियबाणैः पंचभिरक्षरैर्विरामो विश्रामः सा चम्पकमाला कथनीया । आद्यचतुर्थं पंचमषष्ठम् इत्येकत्वे द्विगुर्द्वंद्वौ । इंद्रियाणि च बाणाश्च इंद्रियबाणास्तैः । तथाचोक्तं, रत्नाकरे चम्पकमाला चेद्भ्रमसा गः ॥ १५ ॥ चम्पकमाला । च० अ० १० ग० म, म, स, ग, यतिः ५, ५ ॥

चंपकमाला यत्रभवेदंत्यविहीना प्रेमनिधे ॥
छंदसि दक्षा ये कवयस्तन्मणिबंधं ते ब्रुवते ॥१६॥

अथ नवाक्षरजातौ मणिबंधलक्षणमाह । चम्पकमालेति । हे प्रेमनिधे छन्दसि छन्दोग्रन्थे दक्षाः कुशलास्ते कवयस्तन्मणिबन्धसंज्ञकं ब्रुवते । यत्रांत्यविहीना चम्पकमाला भवेत् । चम्पकमाला तु दशाक्षरा इदं नवाक्षरं भवेत् । लक्षणं तु तदेव । चम्पकमालागतमेव तन्मणिबंधं प्रेम्णः निधिरिव निधिः तस्याः संबुद्धौ अंत्यविहीना अन्तेभवोऽन्त्यो वर्णः तेन विहीना त्यक्ता भवेत् । तदुक्तं रत्नाकरे । भमर्सैर्युक्ता रुक्मवती ॥ १६ ॥ मणिबन्धम् । च० अ० ९, ग० म, म, स, यतिः ५, ४ ॥

ह्रस्वो वर्णो जायते यत्र षष्ठः कंबुग्रीवे तद्वदे-
वाष्टमांत्यः ॥ विश्रामः स्यात्तन्वि वेदैस्तुरंगै-
स्तां भाषंते शालिनीं छान्दसीयाः ॥ १७ ॥

एकादशाक्षरजातौ शालिनीमाह । ह्रस्व इति । हे तन्वि कृशांगि छांदसीयाः छन्दसि कुशलास्तां शालिनीं भाषंते तां कां हे कम्बुग्रीवे । यत्र यस्यां षष्ठो वर्णो ह्रस्वः तद्वदष्टमांत्यः नवमः ह्रस्वो जायते । यत्र वेदैश्चतुर्भिस्तुरंगैः सप्तभिर्विश्रामस्तां शालिनीं भाषंते ब्रुवते । कंबोः शंखस्य ग्रीवावद्ग्रीवा यस्याः सा तत्संबुद्धौ । कम्बुग्रीवा त्रिरेखा स्यादित्यमरः । तदुक्तं रत्नाकरे । शालिन्युक्तास्तौ तगौ गः । १७ ॥ शालिनी । च० अ० ११ ग० म, त, त, ग, ग. । यतिः ४, ७ ॥

चत्वारः प्राक्सुतनु गुरवो द्वौ दशैकादशौ चे-
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशांत्यौ ॥
तद्वच्चांत्यौ युगरसहयैर्यत्र कांते विरामो मंदा-
क्रांतां प्रवरकवयस्तन्वि तां संगिरंते ॥ १८ ॥

चत्वार इति । हे सुतनु सुष्ठु तनुः कायो यस्याः सा तस्याः संबोधनं हे सुतनु प्रवरकवयः श्रेष्ठकवयः तां मन्दाक्रांतां वदंति । तां कां चेद्यदि यत्र

यस्यां प्रागादौ चत्वारो वर्णा गुरवो भवंति । हे सुखे च पुनः द्वौ दशकादशौ वर्णौ गुरू भवतः । हे कुमुदामोदिनि च पुनः तदनु त्रयोदशचतुर्दशौ वर्णौ गुरू भवतः । च पुनः अन्त्यौ तद्वद्भवतः । हे कांते च पुनः युगरसहयैश्चतुः षट्संमितैः क्रमेण विरामो भवति । प्रवरकवयस्तद्विदः ॥ १८ ॥ मन्दाक्रांता । च० अ० १७ ग० म, भ, न, त, त, ग, ग, यतिः ४,६,७॥

मंदाक्रांतांत्ययतिरहिता सालंकारे भवति यदि सा ॥ तद्विद्वद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने ॥ १९ ॥

हंस्या लक्षणमाह । मन्दाक्रांतेति । हे कमलवदने तत्तदा ध्रुवं निश्चयेन हंसी ज्ञेया ज्ञातव्या । कमलवत्सौंदर्यं सौरभादिगुणैः कमलसदृशं वदनं मुखं यस्याःसा तत्संबोधनम् । कथंभूताहंसी विद्वद्भिः पंडितैरभिहिता कथिता । तदा कदा हेसालंकारे यदि मन्दाक्रांता अंत्ययतिरहिता अन्ते भवा अन्त्या मंदाक्रांतायां युगरसहयैः विश्रामः तांत्यरहिता दक्षिणात्मिका सा हंसी ज्ञेया । लक्षणं मंदाक्रांताया एव । अलंकारेण आभूषणेन सह वर्तमाना सालंकारा तस्याःसम्बोधने सालंकारे॥१९॥हंसी । च० अ० १०, ग० म, भ, न, ग, यतिः ४,६ ॥

आद्यचतुर्थमहीननितंबे सप्तमकं दशमं च तथांत्यम् ॥ यत्र गुरु प्रकटस्मरसारे तत्कथितं ननु दोधकवृत्तम् ॥ २० ॥

अथ दोधकवृत्तलक्षणमाह । आद्यचतुर्थमिति । हे प्रकटस्मरसारे कविभिः तत् ननु दोधकवृत्तं कथितम् । प्रकटः स्मरसारः कामबलं यस्याः सा तस्याः संबोधनम् । हे अहीननितंबे अहीनौ स्थूलौ नितंबौ कटिपश्चाद्भागौ यस्याः सा तत्संबुद्धौ । यत्र यस्मिन् आद्यचतुर्थं प्रथमं चतुर्थं सप्तमकं सप्तमं दशमं तथा अन्त्यम् एकादशम् एतानि अक्षराणि गुरूणि सन्ति । तदुक्तं रत्नाकरे । दोधकवृत्तमिदं भभभाद्यौ ॥ २० ॥ दोधकम् । च० अ० ११, ग० भ, भ, भ, ग, ग ॥

यस्यां त्रिषट्सप्तममक्षरं स्याद्ध्रस्वं सुजंघे नवमं च तद्वत् ॥ गत्या विलज्जीकृतहंसकांते तामिंद्रवज्रां ब्रुवते कवींद्राः ॥ २१ ॥

अथेंद्रवज्रालक्षणमाह । यस्यामिति । हे गत्या विलज्जीकृतहंसकांते कवींद्रास्तामिंद्रवज्रां ब्रुवते । गत्या गमनेन विलज्जीकृता हंसस्य कांतिः शोभा यया सा तस्याः संबोधनम् । तां कां यस्यां त्रिषट्सप्तममक्षरं ह्रस्वं स्यात् तद्वन्नवमं ह्रस्वं स्यात् । हे सुजंघे तामिति संबंधः । एतादृशीम् इंद्रवज्रां ब्रुवते सुष्ठु शोभने जंघे यस्याः सा तत्संबुद्धौ । कवीनां कविषु वा इंद्राः पूज्याः बृहस्पत्यादयः । तदुक्तं रत्नाकरे । स्यादिंद्रवज्रा यदि तौ जगौ गः ॥ २१ ॥ इन्द्रवज्रा । च०अ० ११ ग० तौ, त, ज, ग, ग, यतिः ५, ६ ॥

यदींद्रवज्राचरणेषु पूर्वे भवंति वर्णा लघवःसुवर्णे ॥ अमंदमाद्यन्मदने तदानीमुपेंद्रवज्रा कथिता कवींद्रैः ॥ २२ ॥

अथोपेंद्रवज्रालक्षणमाह । यदीति । हे अमंदमाद्यन्मदने तदानीं कवींद्रैः यदींद्रवज्राचरणेषु पूर्वे वर्णा लघवः संति शेषमिंद्रवज्रावत् आद्यवर्णं ह्रस्वमेवेति शेषः । चतुर्ष्वपि पादेषु आद्यो ह्रस्वो हे सुवर्णे सा उपेंद्रवज्रा कथिता । अमंदं बहुलं माद्यन् हर्षं कुर्वन्मदनो यस्यां सा तत्संबुद्धौ । तथा चोक्तं रत्नाकरे उपेंद्रवज्रा जतजास्ततो गौ ॥ २२ ॥ उपेंद्रवज्रा । च० अ० ११, ग० ज, त, ज, ग, ग, यतिः ५, ६ ॥

यत्र द्वयोरप्यनयोस्तु पादा भवंति सीमंतिनि चंद्रकांते ॥ विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुज्यतामित्युपजातिरेषा ॥ २३ ॥

उपजातिलक्षणमाह । यत्रेति । हे चंद्रकांते सा एषा उपजातिरिति प्रयुज्यताम् । कथंभूता सा आद्यैः पुरातनैर्विद्वद्भिः पंडितैः परिकीर्तिता कथिता । सा का हे सीमंतिनि यत्र द्वयोरनयोरिंद्रवज्रोपेंद्रवज्रयोरपि पादा यथाक्रमेण

भवंति । प्रथमे तृतीये च इंद्रवज्रालक्षणं द्वितीये चतुर्थे च उपेंद्रवज्रालक्षणम् । सीमंतः केशवेशो विद्यते यस्याः सा तत्संबुद्धौ।चंद्रवत्कांतिर्यस्याः सा तत्संबुद्धौ।पक्षे चंद्रवत्कांता कमनीया या सा तत्संबुद्धौ । तदुक्तं रत्नाकरे अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ २३ ॥ उपजातिः च० अ० ११, प्रथमे तृतीये च चरणे इंद्रवज्रा द्वितीये चतुर्थे चोपेंद्रवज्रेत्यर्थः ॥

आख्यानकी स्यात्प्रकटीकृतार्थं यदींद्रवज्राचरणः पुरस्तात् ॥ उपेंद्रवज्राचरणास्त्रयोऽन्ये मनीषिणोक्ता विपरीतपूर्वा ॥ २४ ॥

अथाख्यानकीलक्षणमाह । आख्यानकीति । हे प्रकटीकृतार्थे मनीषिणा विदुषा यदि इंद्रवज्रावत्प्रथमचरणः स्यात् अन्ये त्रयश्चरणा उपेंद्रवज्रावत्संति तदा विपरीतपूर्वाख्यानकी विपरीताख्यानकीत्यर्थः । प्रकटीकृतोऽर्थः कामलक्षणो यया सा तत्संबुद्धौ । इयं वृत्तरत्नाकरे नोक्ता तथापि गिरिजादिभिरनाचार्यैर्हलायुधादावुक्तैवम् ॥ २४ ॥ आख्यानकी । च० अ० ११, प्रथमचरण इंद्रवज्रावत् अन्ये उपेंद्रवज्रावत् ॥

आद्यमक्षरमतस्तृतीयकं सप्तमं च नवमं तथांतिमम् ॥ दीर्घमिन्दुमुखि यत्र जायते तां वदंति कवयो रथोद्धताम् ॥ २५ ॥

अथ रथोद्धतालक्षणमाह ।आद्यमिति।हे इंदुमुखि कवयः तां रथोद्धतां वदंति । कां यत्राद्यमक्षरमतस्तृतीयकं सप्तमं नवमं तथांतिमम् एकादशम् एते वर्णा दीर्घा द्विमात्रिका जायंते । इन्दुवन्मुखं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । रान्नराविह रथोद्धता लगौ ॥ २५ ॥ रथोद्धता । च० अ० ११, र० र, न, र, ल, ग, यतिः ७, ४ ॥

अक्षरं च नवमं दशमं चेद्रच्त्यया द्भवति यत्र विनीते ॥ प्रोक्तमेणनयने यदि सैव स्वागतेति कविभिः कथितासौ ॥ २६ ॥

स्वागताया लक्षणमाह । अक्षरमिति । हे एणनयने सैषा रथोद्धता तदा कविभिः स्वागतेति कथिता । हे विनीते नम्रीभूते यदि यत्र यस्यां व्यत्ययाद्विपरीत्येन नवममक्षरं दशमवद्दशमं नवमवत् । नवमो लघु दशमो गुरुः । द्वौ चकारौ विपरीतार्थसूचकौ । एणस्य नयने इव नयने यस्याः सा तस्याः संबुद्धौ । अयमर्थः । रथोद्धतायां नवमम् अक्षरं गुरु भवति दशमं चाक्षरं लघु भवति स्वागतायां तु नवममक्षरं लघु दशमं चाक्षरं गुरु भवतीति भावः । तदुक्तं रत्नाकरे स्वागतेति रनभादगुरुयुग्मम् ॥ २६ ॥ स्वागता । च० अ० ११, ग० र, न, भ, ग, ग, यतिः ॥ ७, ४ ॥

ह्रस्वो वर्णःस्यात्सप्तमो यत्र बाले तद्वद्बिंबोष्ठि न्यस्त एकादशाद्यः ॥ बाणैर्विश्रामस्तत्र चेद्वा तुरंगैर्नाम्ना निर्दिष्टा सुभ्रु सा वैश्वदेवी ॥ २७ ॥

अथ वैश्वदेवीलक्षणमाह । ह्रस्व इति । यत्र सप्तमो वर्णो ह्रस्वः स्यात्। हे बाले षोडशवर्षाभ्यंतरवयस्के तद्वत्पूर्वोक्तप्रकारवत् । हे बिंबोष्ठि एकादशाद्यो दशमो वर्णो ह्रस्वः स्यात् । एवं न्यस्तः निक्षिप्तः स्याच्चेद्यदि तत्र बाणैः पञ्चभिस्तुरङ्गैः सप्तभिश्च विश्रामः स्यात् । हे सुभ्रु सा नाम्ना वैश्वदेवी निर्दिष्टा कथिता । सुष्ठु भ्रुवौ यस्याः सा तस्याः संबुद्धौ । बिंबवदोष्ठौ यस्याः सा एकादशादौ जात एकादशाद्यः । तदुक्तं रत्नाकरे । पञ्चाश्वैश्छिन्ना वैश्वदेवी मौ यौ ॥ २७ ॥ वैश्वदेवी च० अ० १२ ग० म, म, य, य, यतिः ५, ७ ॥

सतृतीयकषष्ठमनंतरते नवमं विरतिप्रभवं गुरु चेत् ॥ घनपीनपयोधरभाग्नते ननु तोटकवृत्तमिदं कथितम् ॥ २८ ॥

द्वादशाक्षरजातौ तोटकलक्षणमाह । सतृतीयकमिति । हे घनपीनपयोधरभारनते ननु इह निश्चितं तोटकवृत्तं कथितं विस्तारितं चेद्यदि हे अनन्तरते सतृतीयकं षष्ठं नवमं गुरु स्यात्तृतीयं षष्ठं च तृतीयषष्ठं ताभ्यां सह वर्तत इति।कीदृशं विरतिप्रभवम् अंत्यं द्वादशं गुरु स्यात् । अनन्ता अपरिमिता रतिर्यस्याः सा अनन्तरतिः तत्संबुद्धौ । घनौ च पीनौ च घनपीनौ कठिननिबिडौ पयोधरौ च

तयोर्भारः आधिक्यं तेन नता नम्रीभूता या सा तत्संबुद्धौ । विरतेः प्रभव उत्पत्तिर्यस्य तत्तथोक्तम् । तदुक्तं रत्नाकरे । इह तोटकमंबुधिसैः कथितम् ॥२८॥ च० अ० १२, स, स, स, स, यतिः ६, ६ ॥

यदाद्यं चतुर्थं तथा सप्तमं चेत्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ॥ शरच्चंद्रविद्वेषिवक्त्रारविंदे तदुक्तं कवींद्रैर्भुजंगप्रयातम् ॥ २९ ॥

भुजङ्गप्रयातलक्षणमाह । यदाद्यमिति । हे शरच्चन्द्रविद्वेषिवक्त्रारविंदे कवीन्द्रैस्तच्छन्दो भुजङ्गप्रयातमुक्तं कथितम् । किं चेद्यदा आद्यं प्रथमं तथा चतुर्थं तथा सप्तमम् एव निश्चितम् एकादशाद्यम् एकादशस्यादिभूतं दशममक्षरं ह्रस्वं स्यात्तदिति संबंधः । शरदः चन्द्रः शरच्चन्द्रः तस्य विद्वेषि वक्त्रमेवारविंदं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ २९ ॥ भुजङ्गप्रयातं च० अ० १२. ग० य, य, य, य, यतिः ६, ६ ॥

अयि कृशोदरि यत्र चतुर्थकं गुरु च सप्तमकं दशमं तथा ॥ विरतिजं च तथैव विचक्षणैर्द्रुत विलंबितमित्युपदिश्यते ॥ ३० ॥

द्रुतविलम्बितलक्षणमाह । अयि कृशोदरीति ॥ अयि इति कोमलालापे । विचक्षणैः पण्डितैर्द्रुतविलंबितमित्युपदिश्यते । इति किं हे कृशोदरि यत्र चतुर्थकं चेत्सप्तमकं तथा दशमम् इमान्यक्षराणि गुरूणि सन्ति । विरतिजम् अंत्यं द्वादशं गुरु स्यादित्यर्थः । कृशमुदरं यस्याः सा कृशोदरी तत्संबुद्धौ । तदुक्तं रत्नाकरे । द्रुतविलंबितमाहनभौ भरौ ॥ ३० ॥ द्रुतविलंबितम् । च० अ० १२, ग० न, भ, भ, र ॥

यदि तोटकस्य गुरु पंचमकं विहितं विलासिनि तदक्षरकम् ॥ रससंख्यकं गुरु न चेदबले भ्रमिताक्षरेति कविभिः कथिता ॥ ३१ ॥

प्रमिताक्षरालक्षणमाह । यदि तोटकस्येति । हे अबले कविभिः प्रमिताक्षरा इति कथिता । किं हे विलासिनि यदि तोटकस्य उक्तलक्षणकस्य पंचमकमक्षरं गुरु विहितं स्यात् रससंख्यकं षष्ठं गुरु न चेत् गुरु तु पंचममेव सा प्रमिताक्षरेत्यर्थः । विलासो विभ्रमो यस्याः सा विलासिनी तत्संबुद्धौ । तदुक्तं रत्नाकरे । प्रमिताक्षरा सजससैरुदिता ॥ ३१ ॥ प्रमिताक्षरा । च० अ० १२. ग० स, ज, स स ॥

प्रथमाक्षरमाद्यतृतीययोर्द्रुतविलंबितकस्य च पादयोः ॥ यदि चेन्न तदा कमलेक्षणे भवति सुंदरि सा हरिणीप्लुता ॥ ३२ ॥

अथ हरिणीप्लुतालक्षणमाह । प्रथमाक्षरमिति । हे कमलेक्षणे सुकविभिः तदेयं हरिणीप्लुता कथिता । यदि द्रुतविलंबितकस्य छन्दस आद्यतृतीययोः पादयोः प्रथमाक्षरं चेत् एकादशाक्षरमेवं विषमपादयोः तदेयं हरिणीप्लुता । कमलवदीक्षणे यस्याः सा तत्संबुद्धौ हे सुन्दरि शुभांगे । तदुक्तं रत्नाकरे १,३, सौ स्लौ गः । २, ४, न्भौ भ्रौ । पक्षे हरिणीप्लुता ॥ ३२ ॥ हरिणीप्लुता । च० १, ३, अ० ११, ग० स, स, स, ल, ग ॥ च २, ४, अ० १२, ग० न, म, म, र ॥

उपेंद्रवज्राचरणेषु संति चेदुपांत्यवर्णा लघवः कृता यदा ॥ मदोल्लसद्भ्रूजितकामकार्मुके वदंति वंशस्थमिदं बुधास्तदा ॥ ३३ ॥

वंशस्थलक्षणमाह ।उपेंद्रवज्रेति । हे मदोल्लसद्भ्रूजितकामकार्मुके तदा बुधा इदं वंशस्थं वदंति । तदा कदा यदा उपेंद्रवज्राचरणेषु उपांत्यवर्णा अंत्यसमीपस्था वर्णा एकादशसंज्ञका लघवः संति प्रतिचरणे एकादशो वर्णो लघुस्तदा वंशस्थम् । मदेन उल्लसंत्यौ भ्रुवौ ताभ्यां जितं कामकार्मुकं मदनधनुर्यया सा तत्संबुद्धौ । अंत्यस्य समीपमुपांत्यम् उपांत्याश्च ते वर्णाश्चेति । तदुक्तं रत्नाकरे । जतौ तु वंशस्थमुदीरितं जरौ ॥ ३३ ॥ वंशस्थम् । च०अ०१२, ग० ज, त, ज, र, यतिः ५, ७ ॥

यस्यामशोकांकुरपाणिपल्लवे वंशस्थपादा गुरु-पूर्ववर्णकाः ॥ तारुण्यहेलारतिरंगलालसे ता-मिन्द्रवंशां कवयः प्रचक्षते ॥ ३४ ॥

इंद्रवंशालक्षणमाह । यस्यामशोकामिति । हे तारुण्यहेलारतिरंगलालसे कवयो यस्यां वंशस्थपादा गुरुपूर्ववर्णका भवन्ति हे अशोकांकुरपाणिपल्लवे तामिंद्रवंशां प्रचक्षते ब्रुवते । अशोकांकुरवत्पाणिपल्लवो यस्याः सा तारुण्यस्य हेलास्तामी-रतिरंगे लालसा अभिलाषो यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । स्यादिंद्रवंशा तौ जौ ॥ ३४ ॥ इंद्रवंशा । च० अ० १२, ग, त, त, ज, र, यतिः ९, ७ ॥

यस्यां प्रिये प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशांतिकम् ॥ सांत्यं भवेद्यदि विरतिर्युगग्रहैः सा लक्षिता ह्यमृतलते प्रभावती ॥ ३५ ॥

त्रयोदशाक्षरजातौ प्रभावतीलक्षणमाह । यस्यामिति अमृतलते यस्यां प्रथ-मकमक्षरद्वयं तुर्यं चतुर्थं तथा नवमं दशांतिकं दशसहितं त्रयोदशमक्षरं गुरु युगग्रहैश्चतुर्भिर्नवमिश्चाक्षरैर्विरतिः सा प्रभावती लक्षिता कथिता । अमृतस्य लतेव लता या सा तत्संबुद्धौ ॥ ३५ ॥ प्रभावती च० अ० १३, ग० त, म, स, ज, ग; यतिः ४, ९ ॥

आद्यं चेत्रितयमथाष्टमं नवांत्यं द्वे चांत्ये गुरु विरतौ सुभाषिते स्यात् ॥ विश्रामो भवति महेशनेत्रदिग्भिर्विज्ञेया ननु सुदति प्रहर्षिणी सा ॥ ३६ ॥

अथ प्रहर्षिणीलक्षणमाह । आद्यमिति ॥ हे सुदति ननु इति निश्चितम् आद्यं त्रितयं प्रथमतः वर्णत्रयम् अथाष्टमं नवांत्यं दशमं चान्त्ये द्वे द्वादशत्रयोदशास्त्ये एते गुरवो भवन्ति । हे सुभाषिते महेशनेत्रैर्वर्णैत्रयानन्तरं दिग्भिर्दशवर्णानन्तरं च विश्रामः स्यात्सा प्रहर्षिणी विज्ञेया ज्ञातव्या । सुष्ठु शोभनं भाषितं यस्याः

सा तत्संबुद्धौ । सु शोभना दन्ता यस्याः सा सुदती तत्संबुद्धौ । तदुक्तं रत्नाकरे म्नौ भ्नौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ३६ ॥ प्रहर्षिणी च० अ० १३, ग० म, न, ज, र, ग; यतिः ३, १० ॥

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ॥ कामांकुशांकुशितकामिमतंगजेंद्रे कांते वसंततिलकां किल तां वदंति ॥ ३७ ॥

चतुर्दशाक्षरजातौ वसंततिलकालक्षणमाह । आद्यमिति हे कामांकुशांकुशितकामिमतंगजेंद्र यत्र आद्यं प्रथमं द्वितीयमपि गुरु चतुर्थं दशमांत्यम् एकादशमुपांत्यं त्रयोदशम् अन्त्यं चतुर्दशम् एते गुरवः स्युः हे कांते बुधास्तां वसंततिलकां वदंति । काम एवांकुशस्तेनांकुशिता वशीकृताः कामिन एव मतंगजेंद्रा यया सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । उक्ता वसंततिलका तभजा जगौ गः ॥ ॥ ३७ ॥ वसंततिलका । च० अ० १४, ग० त, भ, ज, ज, ग, ग ।

प्रथममगुरुषट्कं विद्यते यत्र कांते तदनु च दशमं चेदक्षरं द्वादशांत्यम् ॥ करिभिरथ तुरंगैर्यत्र कांते विरामः सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥ ३८ ॥

पंचदशाक्षरजातौ मालिनीलक्षणमाह । प्रथममिति ॥ हेकांते यत्र प्रथमं षट्कमगुरु लघ्वेव भवति तदनु दशमं द्वादशान्त्यं त्रयोदशं लघु । करिभिरथ तुरंगैरष्टभिः सप्तभिश्च विरामस्तदा सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा कृता । तदुक्तं रत्नाकरे । ननमयययुतेयं मालिनी भोगिलोकैः ॥ ३८ ॥ मालिनी।च०। अ० १५, ग० न, न, म, य, य यतिः ८, ७ ॥

सुमुखि लघवः पंच प्राच्यास्ततो दशमांतिक-स्तदनु ललितालापे वर्णौ यदि त्रिचतुर्दशौ ॥ प्र-

भवति पुनर्यत्रोपांत्यः स्फुरत्करकंकणे यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥ ३९ ॥

सप्तदशाक्षरजातौ हरिणीलक्षणमाह । सुमुखीति । हे स्फुरत्करकंकणे यत्र प्राच्याः प्रथमे पंच वर्णा लघवः संति । ततो दशमांतिक एकादशः हे ललितालापे यदि त्रिचतुर्दशौ त्रयोदशचतुर्दशौ लघू स्याताम् उपांत्यः षोडशोऽपि लघुः । रसैः षड्भिर्वेदैश्चतुर्भिरश्वैः सप्तभिश्च विरामः स्यात्तदा सा हरिणी स्मृता स्फुरंति करयोः कंकणानि यस्याः सा ललित आलापो यस्याः सा । उक्तं च रत्नाकरे । रसयुगहयैर्न्सौ म्लौ गो यदा हरिणी तदा ॥ ३९ ॥ हरिणी च० अ० १७, ग० न, स, म, र, स, ल, ग, यतिः ६, ४, ७ ॥

यदा पूर्वो ह्रस्वः कमलनयने षष्ठकपरास्तो वर्णाः पंच प्रकृतिसुकुमारांगि लघवः ॥ त्रयोऽन्ये चोपांत्याः सुतनु जघनाभोगसुभगे रसैरुद्रैर्यस्यां भवति विरतिः सा शिखरिणी ॥ ४० ॥

अथ शिखरिणीलक्षणमाह । यदा पूर्वो ह्रस्व इति । हे सुतनु जघनाभोगसुभगे यदा पूर्वो वर्णो ह्रस्वो भवति । हे प्रकृतिसुकुमारांगि ततः षष्ठकपराः षष्ठतः पञ्च वर्णाः सप्तमाष्टमनवमदशमैकादशा लघवः संति । अन्ये उपांत्याद्रयो वर्णाश्चतुर्दशपञ्चदशषोडशा लघवो भवंति । यस्यां रसैः षड्भीरुद्रैरेकादशैर्विरतिर्भवेत् । हे सुतनु सा शिखरिणी कथिता । कमलवन्नयने यस्याः सा । प्रकृत्या स्वभावेन सुकुमाराण्यंगानि यस्याः । जघनयोराभोगस्तेन सुभगा । सु शोभना तनुर्यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ ४० ॥ शिखरिणी । च० अ० १७, ग० य, म, न, स, भ, ल, ग, यतिः ६, ११ ॥

द्वितीयमलिकुंतले यदि षडष्टमं द्वादशं चतुर्दशमथ प्रिये गुरु गभीरनाभिह्रदे ॥ सपंचदश-

मंतिमं तदनु यत्र कांते यतिः करींद्रफणिभृत्कु-
लैर्भवति सुभ्रु पृथ्वी हि सा ॥ ४१ ॥

पृथ्वीलक्षणमाह ॥ द्वीतीयमिति । हे सुभ्रु यदि द्वितीयसंख्याकं गुरु स्यात् हे अलिकुंतले षडष्टमं-च गुरु हे प्रिये द्वादशमथ चतुर्दशं गुरु हे गभीरनाभिह्रदे पञ्चदशेन सहितमंतिमं गुरु स्यात् हे कांते यत्र करीन्द्रैरष्टभिः फणिभृत्कुलैर्नवभिश्च यतिः स्यात्तत्पृथ्वीनामकं वृत्त भवति । अलिवद्भ्रमरवच्छयामाः कुंतला अलका यस्याः सा । गम्भीरा निम्ना नाभिरेव ह्रदो यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ ४१ ॥ पृथ्वी । च अ० १७, ग० ज, स, ज, स, य, ल, ग, यतिः, ८, ९ ॥

चत्वारः प्राक्सुतनु गुरवो द्वौ दशैकादशौ चेन्मु-
ग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशांत्यौ ॥
तद्वच्चांत्यौ युगरसहयैर्यत्र कांते विरामो मंदाक्रां-
तां प्रवरकवयस्तन्वि तां संगिरंते ॥ ४२ ॥

मंदाक्रांतालक्षणमाह । चत्वार इति ॥ हे तन्वि प्रवरकवयो यत्र प्राक् चत्वारो वर्णा गुरवः स्युः । हे कुमुदामोदिनि चेद्वर्णौ द्वौ दशैकादशौ गुरू स्तः । हे मुग्धे द्वादशान्त्यौ द्वादशांत्यस्थितौ त्रयोदशचतुर्दशौ गुरू स्याताम् । अंत्यौ षोडशसप्तदशौ तद्वद्गुरू युगरसहयैर्विराम एतादृशीं तां मंदाक्रांतां संगिरंते । कुमुदवदामोदः सुगंधियस्याः सा । तथोक्तं रत्नाकरे । मंदाक्रांता जलधिषडगैर्मौ नतौ तादुरू चेत् ॥ ४२ ॥ मंदाक्रांता । च० अ० १७, ग० म, भ, न, त, त, ग, ग, यतिः ४, ६, ७, ॥

आद्याश्चेद्गुरवस्त्रयः प्रियतमे षष्ठस्तथा चाष्टमो
नन्वेकादशतस्त्रयस्तदनु चेदष्टादशाद्यौ ततः ॥
मार्तंडैर्मुनिभिश्च यत्र विरतिः पूर्णेंदुबिंबानने तद्वृत्तं
प्रवदंति काव्यरसिकाः शार्दूलविक्रीडितम् ॥४३॥

आद्या इति । हे पूर्णेन्दुबिंबानने काव्यरसिकास्तद्वृत्तं शार्दूलविक्रीडितं वदंति । यत्राद्यास्त्रयो गुरवः षष्ठस्तथाऽष्टमः गुरुः ननु एकादशत्रयः द्वादशत्रयोदश-चतुर्दशा गुरवः ततश्चैदृष्टादशस्याद्यौ षोडशसप्तदशौ गुरू स्यातां।यत्र मार्तंडैर्म-निभिर्द्वादशसप्तभिर्विरतिः । हे प्रियतमे तदेतच्छार्दूलविक्रीडितम् । पूर्णश्चास्या-विंदुस्तस्य बिंबवदाननं यस्याः सा । अतिशयेन प्रिया प्रियतमा तस्याःसंबुद्धौ । तदुक्तं रत्नाकरे । सूर्याश्वैर्मसजस्ततताः सगुरवः शार्दूलविक्रीडितम् ॥ ४३ ॥ शार्दूलविक्रीडितम् । च० अ० १९ ग० म, स, ज,स,त, त, ग,यतिः१२,७

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्त-
मोऽपि द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते षोड-
शांत्यौ तथांत्यौ ॥ रंभास्तंभोरुकांते मुनिमुनि-
मुनिभिर्दृश्यते चेद्विरामो बाले वंद्यैः कवींद्रैः
सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ॥ ४४ ॥

इति श्रीकविकालिदासकृतः श्रुतबोधनामक-
श्छंदोग्रन्थः समाप्तः ॥

एकविंशत्यक्षरजातौ स्रग्धरालक्षणम् । चत्वार इति ॥ हे सुदति वंद्यैः पूज्यैः कवींद्रैःप्रसिद्धा इयं स्रग्धरा गदिता । यत्र प्रथमं चत्वारो वर्णा अलघवो गुरवः संति षष्ठकः सप्तमोऽपि तद्वद्गुरुः षोडशाद्यौ चतुर्दशपञ्चदशौ तथान्त्यौ सप्तदशा-ष्टादशौ गुरू स्यातां मुनिमुनिमुनिभिर्विरामः । हे रंभास्तंभोरुकांते हे बाले इयं स्रग्धरा प्रसिद्धा । मृगस्य मदेन मुदिता सा रंभायाः स्तंभवद्ऊर्वोः कांति-र्यस्याः सा सु शोभना दंता यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । म्रैर्भौनां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ ४४ ॥ स्रग्धरा । च०अ० २१ ग० म, र, भ, न, य, य, य, यतिः ७, ७, ॥

इति श्रीश्रुतबोधनामकस्य छन्दोग्रन्थस्य व्याख्या समाप्ता ॥

श्रुतबोधग्रन्थः समाप्तः ।

गणनामदेवताफलानि ।

मो भूमिः श्रियमातनोति य जलं वृद्धिं र चाग्निर्मृतिं सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम् ॥ जः सूर्यो रुजमाददाति विपुलं भेंदुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः ॥ १ ॥

अथ गणसंख्यानामरूपदेवताफलज्ञापकं यंत्रम् ।

	गणनाम	रूपम्	देवता	फलम्	मित्रादि	फलम्
१	मगणः	ऽ ऽ ऽ	मही	लक्ष्मीः	मित्रम्	शुभम्
२	नगणः	। । ।	स्वर्गः	बुद्धिः	मित्रम्	शुभम्
३	भगणः	ऽ । ।	शशी	यशः	दासः	शुभम्
४	यगणः	। ऽ ऽ	जलम्	आयुः	दासः	शुभम्
५	जगणः	। ऽ ।	रविः	रुक्	उदासः	अशुभम्
६	रगणः	ऽ । ऽ	अग्निः	दाहः	शत्रुः	अशुभम्
७	सगणः	। । ऽ	वायुः	विदेशः	शत्रुः	अशुभम्
८	तगणः	ऽ ऽ ।	नभः	शून्यम्	उदासः	अशुभम्

अथ सटीको वृत्तरत्नाकरः-प्रारभ्यते.

श्रीगणेशायनमः ॥ सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ॥ गौरीविनायकोपेतं शंकरं लोकशंकरम् ॥ १ ॥

तेन केदारेणेदं छंदः क्रियते । किं कृत्वा शंकरं नत्वा किमर्थं तत्र सुखसंतानसिद्ध्यर्थं सुखस्य संतानोऽविच्छेदस्तस्य सिद्धिर्निष्पत्तिस्तदर्थं नत्वा । अथ सुखं च सन्तानश्च सिद्धयश्च सुखसन्तानसिद्धयः तदर्थं नत्वा सुखमात्यन्तिकं मोक्षलक्षणं सन्तानः पुत्रपौत्रः सिद्धयोऽणिमाद्यस्तदर्थं तेन केदारेणेदं वृत्तरत्नाकरं नाम छन्दः क्रियते इति संबन्धः । किंविशिष्टं शंकरं ब्रह्मा च अच्युतश्च ब्रह्माच्युतौ ताभ्यामर्चितम् । पुनः किंविशिष्टं गौरीविनायकोपेतं गौरी च विनायकश्च गौरीविनायकौ ताभ्यामुपेतं सहितम् । पुनः किंविशिष्टं लोकशंकरं लोकानां शं सुखं करोतीति लोकशंकरस्तम् ॥ १ ॥

वेदार्थशैवशास्त्रज्ञः पव्येकोऽभूद्द्विजोत्तमः ॥
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥ २ ॥

वेदार्थञ्च शैवशास्त्राणि च जानातीति वेदार्थशैवशास्त्रज्ञः एवंविधः पव्येको नाम द्विजोत्तमोऽभूज्जातस्तस्य पुत्रः केदारोऽस्ति स किंविशिष्टः शिवस्य ईश्वरस्य पादौ शिवपादौ तयोरर्चनं पूजनं तस्मिन् शिवपादार्चने रतः आसक्तः ॥ २ ॥

तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ॥
वृत्तरत्नाकरं नाम बालानां सुखबुद्धये ॥ ३ ॥

किंविशिष्टं छन्दः लक्ष्यलक्षणसंयुतं लक्ष्यमुदाहरणं च लक्षणं छंद-स्वरूपकथनं च लक्ष्यलक्षणे ताभ्यां संयुतम् अन्येषु रामशर्मादिकृतेषु छन्दःशास्त्रेषु लक्षणं सूत्रमेवास्ति लक्ष्यं प्रयोगो नास्ति एतत्पुनरुभाभ्यामिह युक्तम् । वृत्तान्येव श्रीप्रभृतीनि रत्नानि तेषामाकरं वृत्तरत्नाकरं नाम ॥ कस्मै बालानामनधीतच्छन्दःशास्त्राणां सुखबुद्धये सुखावबोधाय ॥ २ ॥ त्रिभि-र्विशेषकम् ॥

पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ॥
मात्रावर्णविभेदेन च्छन्दस्तदिह कथ्यते ॥ ४ ॥

यत्पिंगलादिभिराचार्यैर्लौकिकं छन्दो द्विधोक्तं तेन प्रकारेण मात्राकारेण वर्णाकारेण च तदिहास्मिन्ग्रंथे छन्दः कथ्यते । लोके यत् लौकिकं न पुनर्वैदिकं काव्यादिष्वनुपयोगात् ॥ ४ ॥

षडध्यायानिबद्धस्य छन्दसोऽस्य परिस्फुटम् ॥
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५ ॥

अस्य छंदसः प्रमाणमपि परिस्फुटं परे समंतात्प्रकटं विज्ञेयं ज्ञातव्यम् । किंविशिष्टस्य छंदसः षट् च तेऽध्यायाश्च षडध्यायास्तैर्निबद्धं तस्य किं प्रमाणं शतम् । किंविशिष्टं शतं षट्त्रिंशताधिकम् ॥ ५ ॥

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ॥ समस्तं
वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६ ॥

एभिर्दशभिरक्षरैः सकलं वाङ्मयं वाग्जालं व्याप्तं कुक्षीकृतम् । किमिव त्रैलोक्यमिव केन विष्णुना नारायणेन । एभिः कैः म्यरस्तजभ्नगैः लांतैः ॥ ६ ॥

सर्वगुर्मो मुखान्तर्लौ यरावंतगलौ सतौ॥ग्मध्या-
द्यौ ज्भौ त्रिलो नोष्टौ [illegible]त्यत्र गणास्त्रिकाः ॥७॥

इदानीं तेषामक्षराणां लक्षणमाह । सर्वगुरुर्मः मगणःSSS मुखे आदौ अंत-र्मध्ये लौ लघुर्ययोस्तौ मुखांतर्लौ यरावरगणौ । मुखलघुर्यगणः ।SS मध्यलघु

रगणः ऽ । ऽ अंते अवसाने गुरुर्लघुश्च ययोस्तौ अंतगलौ सतौ सगणतरणौ अंतगुरुः सगणः ॥ऽ अंतलघुस्तगणः ऽऽ । गुरुर्मध्ये आद्ये ययोस्तौ ज्भौ जगणभगणौ मध्यगुरुर्जगणः । ऽ । आदिगुरुर्भगणः ऽ॥ त्रीणि लघूनि यस्य सः त्रिलघुर्नगणः ॥। अत्रास्मिन् छंदसि अष्टौ गणास्त्रिकाख्यवयवा भवंति ॥७॥

ज्ञेयाः सर्वांतमध्यादिगुरवोऽत्र चतुष्कलाः ॥
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ ८ ॥

आर्यादिषु स्थिताः पंच गणाः ज्ञेयाः । किंविशिष्टाः चतुष्कलाः चतुर्मात्राः ते के पंच गणाः सर्वांतमध्यादिगुरवः सर्वश्च अन्तश्च मध्यश्च आदिश्च ते गुरवो येषां ते सर्वांतमध्यादिगुरवः किंभूतास्ते लघूपेताः पंचमो गणश्चतुर्लघुस्तेनोपेताः युक्ताः । स्थापना चैषा सर्वगुरुःऽऽऽ अंत्यगुरुः ॥ऽ मध्यगुरुः । ऽ । आदिगुरुः ऽ । । चतुर्लघुः । । । । । इति ॥ ८ ॥

सानुस्वारो विसर्गांतो दीर्घो युक्तपरश्च सः ॥
वा पादांते त्वसौ ग्वक्त्रो ज्ञेयोऽन्यो मातृको ऋजुः९॥

सानुस्वारः सह अनुस्वारेण वर्तत इति सानुस्वारः विसर्गांतः विसर्गः अन्ते यस्य सः विसर्गांतः दीर्घः युक्तपरः युक्तं संयोगाक्षरं परं यस्मात्स युक्तपरः एतादृशः वर्णः वा विकल्पेन पादांते गुरुर्भवति । असौ गुरुस्तु पुनः स च प्रस्तारे वक्त्रो ज्ञेयः अन्यो अस्माद्विपरीतो मातृकः एकमातृकः स च प्रस्तारे ऋजुः पंचलघुर्भवति । (ऽ) गुरुः (।) लघुः ॥ ९ ॥

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ॥ पुरः-
स्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः ॥ १० ॥

इहच्छन्दसि, पादादौ वर्णस्य संयोगः क्रमसंज्ञकः स्यात्तेन वर्णस्य संयोगेन पुरःस्थितेन अग्रस्थितेन क्वचिद्गुरोरपि लघुता स्यात् ॥ १० ॥

इदमस्योदाहरणम् ॥ तरुणं सर्षपशाकं नवोदनं

पिच्छिलानि च दधीनि ॥ अल्पव्ययेन सुन्दरि
ग्राम्यजनो मिष्टमश्नाति ॥ ११ ॥

अस्योदाहरणं दर्शयति । हे सुंदरि स्तोकद्रव्येण ग्राम्यजनो मिष्टं मधुरमश्नाति भुंक्ते किं तरुणमभिनवं सर्षपशाकं नवांकुरं पिच्छिलानि चिक्कणानि दधीनि दुग्धं च ॥ अत्रार्यायां ग्रा इत्येतस्मिन् पादादिस्थितेन सुन्दरि इत्येतस्य यदि गुरुत्वं क्रियते तदा युक्तपरत्वात्पंचलो भवति चतुर्मात्रागणाः आर्यायाः कर्तव्याः तस्माच्छंदःकरणाय क्वचिद्गुरोरपि लघुत्वं भवतीति ॥ ११ ॥

अब्धिभूतरसादीनां ज्ञेया संज्ञात्र लोकतः ॥
ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञिका ॥ १२ ॥

उत्तरत्र अंकैः संज्ञामाह ॥ अब्धयः समुद्राश्चत्वारः ४ भूतानि पंच महाभूतानि ५ रसाः षट् ६ आदिशब्दग्रहणेन अश्वाः पर्वताः मुनयश्च सप्त ७ अष्टौ वसवश्च ८ नव ग्रहाः रंध्राणि च ९ दश दिशः १० एकादश रुद्राः ११ द्वादश सूर्याः १२ त्रयोदश विश्वेदेवाः १३ चतुर्दश भुवनानि १४ इत्यादयो गृह्यते । एताः संज्ञाः लोकतः पूर्वाचार्येभ्योऽवगंतव्याः ज्ञेयाः । चतुर्थः अंशः पादो ज्ञेयः यतिर्विरतिः किं कथ्यते विच्छेदसंज्ञिका ॥ १२ ॥

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते ॥
सममर्द्धसमं वृत्तं विषमं च तथा परम् ॥ १३ ॥

सद्भिः सत्पुरुषैः समं स्थानं युङ्निगद्यते । विषमं स्थानमयुङ्निगद्यते समं वृत्तं भवति अर्धसमं तथा परं विषमं भवति ॥ १३ ॥

अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ॥
तच्छंदःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४ ॥

तल्लक्षणमाह । यस्य वृत्तस्यांघ्रयः पादाश्चत्वारस्तुल्यलक्षणलक्षिता भवंति तद्वृत्तं छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते वदन्ति ॥ १४ ॥

प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् ॥
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥ १५ ॥

यस्य वृत्तस्य प्रथमपादस्तृतीयेन पादेन समो भवेत् द्वितीयपादश्चतुर्थपादवत्त-द्वृत्तमर्धसमं भवेत् ॥ १५ ॥

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ॥
तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदाः ॥ १६ ॥

यस्य पादचतुष्टयेऽपि परस्परं लक्षणं भिन्नं भेदयुक्तं भवति तद्विषमं वृत्तं छंदःशास्त्रविशारदा आहुः कथयंति ॥ १६ ॥

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः ॥
पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गदम् ॥ १७ ॥

एकैकाक्षरात्पादादारभ्य आदौ कृत्वैकैकमक्षरं वर्धितं येषु पादेषु ते एकै-काक्षरवर्धितास्तैः एकैकाक्षरवर्धितैः पादैः पृथक् छन्दो भवेत् पादैरित्यंभूते-र्यावत् षड्विंशतिं गतम् । तथा च प्रथमजातावुक्तायां चत्वारोप्येकाक्षराः पादा भवंति अत्युक्तजातौ चत्वारोपि द्व्यक्षराः पादा भवंति इत्थं यावत् यथा वृत्तावृत्तयोश्चत्वारोपि पादाः षड्विंशतिवर्णप्रमाणा भवंति ॥ १७ ॥

तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः ॥
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥१८॥

यस्याः षड्विंशत्यक्षरजातेरूर्ध्वं चण्डवृष्टिरादिर्येषां ते च ते दंडकाश्च ते चंडवृष्ट्यादिदण्डकाः परि समंतात्कीर्तिताः कथिताः । उक्तान्यच्छन्दः शेषं सा गाथा । सा च त्रिभिः षड्भिर्वा चरणैः पादैरुपलक्षिता चिह्निता भवति ॥ १८ ॥

उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ॥
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ १९ ॥

इदानीं छन्दोजातेरुद्देशमाह । उक्ता १ अत्युक्ता २ मध्या ३ प्रतिष्ठा ४ अन्या सुपूर्विका सुप्रतिष्ठा ५ गायत्री ६ उष्णिक् ७ अनुष्टुप् ८ बृहती ९ पंक्तिः १० ॥ १९ ॥

त्रिष्टुप् च जगती चैव तथातिजगती मता ॥
शक्करी सातिपूर्वा स्यादष्टचत्यष्टी ततः स्मृते ॥२०॥

त्रिष्टुप् ११ जगती १२ अतिजगती १३ शक्करी १४ सा शक्करी अतिपूर्वा स्यादतिशक्करी १५ अष्टिः १६ अत्यष्टिः १७ ॥ २० ॥

धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ॥
विकृतिः संकृतिश्चापि तथाभिकृतिरुत्कृतिः ॥२१ ॥

धृतिः १८ अतिधृतिः १९ कृतिः २० प्रकृतिः २१ आकृतिः— २२ विकृतिः २३ संकृतिः २४ अभिकृतिः २५ उत्कृतिः २६ ॥ २१ ॥

इत्युक्ताश्छंदसां संज्ञाः क्रमशो वच्मि सांप्रतम् ॥
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २२ ॥
इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे प्रथमोऽध्यायः ॥ १ ॥

इति छंदसां संज्ञां जात्याख्याः क्रमशः क्रमेण उक्ताः । सांप्रतं सर्ववृत्तानां लक्षणं चिह्नं वच्मि भणामि मात्रावृत्तान्यार्यादीनि अनुपूर्वं यस्मिँल्लक्षणे तन्मात्रावृत्तानुपूर्वकं लक्षणं भणामीति संबंधः ॥ २२ ॥

इति वृत्तरत्नाकराख्यच्छन्दःशास्त्रस्य टीकायां प्रथमोऽध्यायः ॥ १ ॥

आर्यालक्षणमाह ॥ लक्ष्मैतत्सप्त गणा गोपेता
भवति नेह विषमे जः ॥ षष्ठोऽयं नलघुर्वा
प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥ ॥ ॥

सांप्रतमार्यालक्षणमाह । आर्यायाः प्रथमेर्धे एतल्लक्ष्म लक्षणं नियतं निश्चितं वर्तते ।एतल्किं सप्त गणा गोपेता इहास्यामार्यायां विषमे स्थाने प्रथमतृतीयपंच-

सप्तमरूपे जगणो न भवति षष्ठश्चायं जगणो भवति अथवा नलघुर्भवति इत्यार्याप्रथमदले निश्चितं लक्षणं भवति शिष्येण पृष्टम् आर्यायाः क्वचित्पद-नियमोऽस्ति । गुरुराह ॥ १ ॥

षष्ठे द्वितीयलात्परकेऽन्ले मुखलाच्च सयतिप-दनियमः ॥ चरमेर्धे पंचमके तस्मादिह भवति षष्ठो लः ॥ २ ॥

षष्ठे द्वितीयेत्यादिव्याख्या । षष्ठेऽन्ले षष्ठस्थानवर्तिनि नलघुरूपे द्वितीयलात् द्वितीयलघोः प्रारभ्य नियमो भवति षष्ठे नगणलघौ प्रारभ्य नियमो भवति षष्ठे नगणलघौ सति प्रथमलघुस्थाने यतिरित्यर्थः । तथा परके पुरोवर्तिनि सप्तम-केऽन्ले नलघौ सति मुखलात्परः पदनियमो भवति षष्ठगणांते यतिरित्यर्थः । पंचमीत्वात्पूर्वसंग्रहः । अत्र पंचमी अर्वाक्सूचिका दृश्यते । यथा पाटलिपुत्रा-द्दृष्टो देव इत्यत्र पाटलिपुत्रपुरादर्वाक् इति गम्यते । चरमेर्धे द्वितीयदले पंचम-के न्ले सति पंचमगणस्थानवर्तिनि नलघौ सति तस्मान्मुखलघुतः परतः पदनि-यमो भवति चतुर्थगणांते यतिरित्यर्थः । इह द्वितीयेऽर्धे षष्ठोलो लघुर्भवति॥२॥

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याम्॥ पथ्येति नाम तस्याश्छंदोविद्भिः समाख्यातम्॥३॥

यस्याः आर्यायाः द्वयोराद्येषु त्रिष्वंशेषु गणेषु द्वादशमात्रासु पादो दृश्यते शेषं प्रकटम् ॥ ३ ॥

संलंघ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ॥ यस्यास्तां पिंगलनागो विपुलामिति समाख्याति ॥ ४ ॥

यस्या आर्याया द्वयोः शकलयोरादिमं गणत्रयं विलंघ्यातिक्रम्य पादो भवति तां पिंगलश्चासौ नागश्च पिंगलनागः पिंगलाचार्यस्य शेषरूपत्वात् । विपुलार्या-मिति समाख्याति ॥ ४ ॥

उभयार्धयोर्जकारौ द्वितीयतुर्यौगमध्यगौ यस्याः ॥ चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ५ ॥

यस्या आर्यायाः उभयार्धयोर्द्वितीयतुर्यौ जकारौ स्यातां जकारौ किंभूतौ गुरू मध्यगतौ तस्याः चपलेति नाम नागराजेन प्रकीर्तितं कथितम् ॥ ५ ॥

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ॥ शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥

यस्या आर्याया आद्यं दलं प्रथमं चपलागतं चपलाश्रितं लक्ष्म लक्षणं समस्तं भजेत आश्रयेत शेषे पश्चिमेऽर्धे पूर्वजं लक्ष्म यस्याः सा पूर्वजलक्ष्मा मुखे आदौ चपला मुखचपला सा उदिता कथिता मुनिना पिंगलेन ॥ ६ ॥

प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः॥ लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥७॥

इत्यार्याप्रकरणम् ।

प्रथमेर्द्धे प्राक् पूर्वे प्रतिपादितं कथितं सप्तगणा गोपेता भवति नेह विषमे ज इत्यादिलक्षणमाश्रयेत पुनः प्रथमेतरे तु चरमेऽर्द्धे चपलायाः लक्ष्म लक्षणमाश्रयेत सा विशुद्धधीभिर्जघने पश्चाद्भागे चपला इव जघनचपलोक्ता ॥ ७ ॥ इति पंचार्यामेदाः

॥ इत्यार्याप्रकरणम् ॥

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥ दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजंगेशः ॥ १ ॥

अधुना गीतिलक्षणमाह ॥ यदि कथमप्यार्यायाः प्रथमदलोक्तं लक्षणमुभयोरपि दलयोर्भवेत् तां गीतिं भुजंगेशः पिंगलः गीतवान् ॥ गीतिं किंविशिष्टां कृता यतिभिर्विच्छेदैः शोभा यस्याः सा तथा ताम् ॥ १ ॥

आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ॥
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥२॥

यदार्याद्वितीयकेऽर्धे लक्षणं गदितं कथितं वर्तते तल्लक्षणम् उभयोरपि दलयोः स्यात्तदा तामुपगीतिं मुनिः पिंगलो ब्रूते भणति ॥ २ ॥

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ॥
सोद्गीतिः किल कथिता तद्वद्व्यत्यंशभेदसंयुक्ता ॥ ३ ॥

यस्या आर्यायाः शकलद्वितयं खंडद्वयं व्यत्ययरचितं प्रथमे स्थाने द्वितीयं द्वितीयस्य स्थाने प्रथमं लक्षणं भवेत् प्रथमे दले मात्रा २७ द्वितीयदले मात्राः ३० सा उद्गीतिः किलशब्दो निश्चये एतर्ह्येवं किल श्रूयते । कथिता तद्वत् तेनैव प्रकारेण यतयश्च अंशाश्च यत्यंशाः तेषां भेदस्तेन संयुक्ता ॥ ३ ॥

आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ॥ इतरत्तद्वन्निखिलं दलं यदीयमुदितैवमार्यागीतिः ॥ ४ ॥

इति गीतिप्रकरणम् ।

यदि आर्यापूर्वार्धमेकेनाधिकेन गुरुणा निधने अवसाने युक्तं भवति तदीयमितरद्वितीयं दलं निखिलं समस्तं तद्वत्तस्येव पूर्वदलवद्भवति तदैवमार्यागीतिरुक्ता उदिता समस्तपादेषु कला द्वात्रिंशत् ३२ भवंति ॥ ४ ॥ इति चतस्रो गीतयः ॥ इति गीतिप्रकरणम् ॥

षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः ॥ न समात्र परश्रिताः कला वैतालीयेऽते रलौ गुरुः ॥ १ ॥

अत्र वैतालीये छन्दसि विषमे पादे प्रथमतृतीयरूपे षट् कला भवंति समे पादे द्वितीयचतुर्थरूपेऽष्टौ कला भवंति च पुनस्ताः कलाः

समे पादे निरंतरा अन्तररहिता लघवो न स्युः अत्र वैतालीये समकला द्वितीया चतुर्थी षष्ठी च पराश्रिता न भवति कोर्थः द्वितीया लघुरूपा कला तृतीयकलायां न मिलति चतुर्थी पंचम्यां षष्ठी सप्तम्यां चेत्थं न स्यात् पूर्वाश्रिताः स्युः द्वितीया प्रथमायां चतुर्थी तृतीयायामेवं स्यात् । अन्ते षट् कलाग्रतोऽष्टकलाग्रतश्च रलौ रगणलघू कार्यौ ततो गुरुरेक इति चतुष्पादेषु ॥ १ ॥

पर्यंते यौ तथैव शेषं त्वौपच्छंदसिकं सुधीभिरुक्तम्॥२

पर्यंते अंते यौ रगणयगणौ भवतः शेषं तथैव षट् कला विषमेऽष्टौ समे तदौपच्छंदसिकं सुधीभिः पंडितैरुक्तं भणितम् ॥ २ ॥

आपातलिका कथितेयं भाद्भुरुकावथ पूर्ववदन्यत् ॥३॥

भाद्भगणाद्भुरुकौ द्वौ यदि भवतस्तदा आपातलिका नाम छन्दो भवति अथानंतरमन्यत्पूर्ववत् ॥ ३ ॥

तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः ॥४॥

समस्तपादेषु द्वितीयो लघुस्तृतीयेन सह युक् संमिलितो भवेत् तदा दक्षिणांतिका नाम छन्दो भवति ॥ ४ ॥

उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण भवेदयुग्मयोः॥५॥

यत्र अयुग्मयोर्विषमपादयोर्द्वितीयो लघुरग्रेण तृतीयेन लघुना सह सक्तः संबद्धो मिलितो भवति सा उदीच्यवृत्तिरुदिता कथिता ॥ ५ ॥

पूर्वेण युतोऽथ पंचमः प्राच्यवृत्तिरुदितेति युग्मयोः॥६॥

अथ यत्र युग्मयोः समपादयोः पंचमो लघुः पूर्वेण युतश्चतुर्थेन संयुक्तो भवति सा प्राच्यवृत्तिरुदिता ॥ ६ ॥

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम्॥७॥

ओजयुग्मकौ विषमसमौ यदा पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ तुल्यौ यथासंख्येन विषमसमौ यदा वा भवतस्तदा प्रवृत्तकं नाम छन्दो भवति ॥ ७ ॥

अस्य युग्मरचिताऽपरांतिका ॥ ८ ॥

अस्य वैतालीयस्य युग्मरचिता समपादरचिता समस्तपादेष्वष्टौ कला रगणो लघुर्गुरुश्च भवति साऽपरांतिका नाम छन्दः ॥ ८ ॥

अयुग्मगा चारुहासिनी ॥ ९ ॥

इति वैतालीयप्रकरणम् ।

वैतालीयादेर्विषमपादजाता समस्तपादेषु सैव लक्षणेन चारुहासिनी भवति ॥ ९ ॥

इति वैतालीयप्रकरणम् ॥

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् ॥ १ ॥

आद्यात्प्रथमाक्षरात्परतो नसौ नगणसगणौ न स्यातां न भवेतां किंतु हि नियमेनाब्धेः परो यो यगणः कार्यस्तदा वक्त्रं नाम छन्दः स्यात् । अनुष्टुभि अनुष्टुप्प्रकरणे ख्यातं प्रसिद्धम् ॥ १ ॥

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् ॥ २ ॥

युजोः समपादयोः सरिद्भर्तुः समुद्राच्चतुरक्षरात् जेन जगणेन कृत्वा पथ्यावक्त्रं नाम छन्दः प्रकीर्तितं कथितम् ॥ २ ॥

अयुजोर्जेन वारिधेस्तदेव विपरीतादि ॥ ३ ॥

अयुजोर्विषमपादयोर्वारिधेश्चतुरक्षरात्परे पादे जेन जगणेन तदेव पथ्यावक्त्रं नाम विपरीतादि विपरीतपथ्यावक्त्रं भवतीत्यर्थः ॥ ३ ॥

चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥ ४ ॥

अयुजोः विषमपादयोः पयोराशेः समुद्राच्चतुरक्षराच्चेद्यदि नकारो नगणो भवति तदा चपलावक्त्रं नाम छंदः स्यात् ॥ ४ ॥

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥५॥

यस्यां छंदोजातौ सप्तमस्थाने युग्मे समपादे सप्तमो लो लघुर्भवति सा युग्मविपुला मताऽभिप्रेता ॥ ५ ॥

सैतवस्याखिलेष्वपि ॥ ६ ॥

सैतवस्याचार्यस्याभिप्रायेण यस्याः सकलेषु समस्तेषु सप्तमो लघुर्भवति सा युग्मविपुला भवति ॥ ६ ॥

भेनाब्धितो भाद्विपुला ॥ ७ ॥

अब्धितः समुद्राद्भेन भगणेन भाद्भकारात्परा विपुला भविपुलेत्यर्थः ॥ ७ ॥

इत्थमन्या रश्चतुर्थात् ॥ ८ ॥

इत्थममुना प्रकारेण चतुर्थाच्चतुरक्षरात् रो रगणो यदि भवति तदान्या-रविपुला भवति ॥ ८ ॥

नोम्बुधेश्चेन्नविपुला ॥ ९ ॥

अंबुधेः समुद्राच्चतुरक्षरात्परो यदि नोः नगणस्तदा नविपुला भवति ॥ ९ ॥

तोऽब्धेस्तत्पूर्वान्या भवेत् ॥ १० ॥

इति वक्त्रप्रकरणम् ।

अब्धेश्चतुरक्षराद्यदि तस्तदा अन्या विपुला तत्पूर्वा तद्विपुला भवति ॥१०॥

इति वक्त्रप्रकरणम् ॥

द्विकगुणितवसुलघुरचलधृतिरिति ॥ १ ॥

अथात्र वृत्तान्यधिक्रियंते तान्येवाह ॥ द्वावेव द्विकौ द्वाभ्यां गुणिता वसवोष्टौ लघवो यस्यां सा द्विकगुणितवसुलघुःअचलधृतिर्नाम छन्दो भवति तथा आपदा-कुलकं छंदो यावद्विकगुणितवसुलघुरिति वर्तते तेनोत्तरत्र षोडश मात्रा अधिक्रियंते ।

मात्रासमकं नवमाल्गंतम् ॥ २ ॥
उपचित्रा नवमे परयुक्ते ॥ ३ ॥
अष्टाभ्यो भाद्वावुपचित्रा ॥ ४ ॥
जान्लावथाम्बुधेर्विश्लोकः ॥ ५ ॥

, मात्रासमकं छन्दः स्याद्यत्र नवमो द् लघुः ग् गुरुः अंते यस्य तत् षोडशमात्राः । अष्टाभ्यो मात्राभ्यः परयुक्ते दशमयुक्ते नवमे मात्राषोडशके उपचित्रा भवति । अष्टाभ्यो मगणस्तस्माद्यौ गुरू यदीयौ भवतस्तदा उपचित्रा स्यात् । अंबुधेश्चतसृभ्यो मात्राभ्यः परो जगणो यदि भवति न्लौ वा नगणलघू वा भवतस्तदा विश्लोकोनाम छन्दो भवति ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

तद्युगलाद्धानवासिका स्यात् ॥ ६ ॥

तद्युगलादम्बुधियुग्मात् अष्टाभ्यो मात्राभ्यः परो जो यदि वान्तौ तदा वान्वासिकानाम छन्दो भवति ॥ ६ ॥

बाणाष्टनवसु यदि लश्चित्रा ॥ ७ ॥
यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः
कलितम् ॥ अनियतवृत्तपरिमाणसहितं प्रथितं
जगत्सु पादाकुलकम् ॥ ८ ॥

बाणाष्टनवसु पंचमाष्टनवमात्रासु यदि लो लघुस्तदा चित्रानाम छन्दः ॥ ७ ॥ यदिति । अतीतं पूर्वं कृतं विविधं नानारूपं लक्ष्म लक्षणं तेन कलितैः प्रागुक्तमात्रासमादिलक्षणसहितैः पादैर्यच्छन्दः कलितमनियतमनिश्चितं यद्वृत्तपरिमाणं तेन सहितमेवंविधं जगत्प्रसिद्धं यत्तत्पादाकुलकं नाम छंदः ॥ ८ ॥

वृत्तस्य लो विना वर्णैर्गा वर्णा गुरुभिस्तथा ॥
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥९॥

वृत्तस्येति । यस्य कस्यापि वृत्तस्य लो लघवो मात्रारूपा भवंति तेभ्यो वर्णरक्षरैर्विना गा गुरुसंख्या भवति तथा तेभ्यो लघुभ्यो गुरुभिस्तत्संख्यां विना वर्णसंख्या भवति तेभ्यो मात्राभ्यः तैर्लघुभिर्विना शेषमात्राणां च दले कृते सति तत्संख्यका गुरवो वाच्याः । ॥ यथात्रैव वृत्ते एवं सर्वत्र ज्ञेयम् ॥ ९ ॥

शिखिगुणितदशलघुरचितमपगतलघुयुगलमप-
रमिदमखिलम् ॥ सगुरुकशकलयुगलमपि सुप-
रिघटितललितपदनिचिति भवति शिखा॥ १०॥

शिखीति ॥ शिखी अग्निः ३शिखिभिस्त्रिभिर्गुणिता ये दश लघवस्तैरचितं यत्तत् । पुनः कीदृशमपगतं लघुयुगलं यस्मात्तत् । एवं प्रथमं दलं तथापरं द्वितीयं दलमखिलं संपूर्णं त्रिंशन्मात्रकं तथा दलद्वयमपि सगुरुकम् । कोऽर्थः प्रथमे दलेऽष्टाविंशतिलघवः प्रांते गुरुश्च द्वितीये त्रिंशन्मात्राः प्रांते गुरुरेवं दलद्वये द्विषष्टिलघव इत्यर्थः । कथंभूतं सुपरि शोभनप्रकारेण घटितानि बद्धानि मनोज्ञानि पदानि तेषां निचितौ रचना यस्मिंस्तच्छिखानाम छन्दो भवति॥ १० ॥

विनिमयविहितसकलयुगललघुललितपदवितति-
रचितगणनिचया ॥ श्रुतिसुखकृदियमपि जगति
जशिर उपगतवति जि सति भवति स्वजा॥ ११॥

विनिमयेन वैपरीत्येन विहितं यत्सकलयुगलं तस्य लघवस्तैर्ललिता या पदवितिःपदश्रेणिस्तया रचिता निबद्धा गणसमूहा यस्यां सा श्रुत्योः सुखं करोतीति श्रुतिसुखकृत् क सति जि जकारे जकारस्य शिरसि उपगतवतीत्यर्थः । स्वज्ञानाम छन्दः ॥ ११ ॥

अष्टावर्धे गा द्व्यभ्यस्ता यस्याः सानंगक्रीडोक्ता ॥
दलमपरमपि वसुगुणितसलिलनिधिलघुकविर-
चितपदवितति भवति ॥ १२ ॥

यस्या अर्धे दले अष्टौ गा गुरवो भवंति कथंभूता गुरवः द्व्यभ्यस्ता द्विगुणिताः षोडश गुरव एव स्युरित्यर्थः । तथापरं द्वितीयमपि दलं वसुभिरष्टभिर्गुणिता ये सलिलनिधयश्चत्वारो लघवो यत्तत्कविभी रचिता पदवितिः पदश्रेर्णियस्य तत् सा अनंगक्रीडानाम छन्दो भवति ॥ १२ ॥

त्रिगुणनलघुरवसिति गुरुरिति दलयुगकृततनु-
रिह रुचिरा ॥ १३ ॥
इति मात्राप्रकरणम् ॥ इति श्रीभट्टकेदारविरचिते
वृत्तरत्नाकरे द्वितीयोऽध्यायः ॥ २ ॥

त्रिगुणास्त्रिभिर्गुणिता नव लघवो यस्यां सा त्रिगुणनवलघुः अवसितौ अवसाने गुरुर्यस्याः सा अवसितिगुरुः इत्येवं दलयुगेन खंडयुग्मेन कृता तनुर्यस्याः सा दलयुगकृततनुः रुचिरानामेति छंदः ॥ १३ ॥

इति वृत्तरत्नाकराख्ये छंदसि टीकायां मात्राप्रकरणवृत्तौ द्वितीयोऽध्यायः ॥ २ ॥

उक्ता गः श्रीः ॥ १ ॥ अत्युक्ता गौ स्त्री ॥ २॥
मध्या मो नारी रोमृगी ॥ ३ ॥ प्रतिष्ठा म्गौ
चेत्कन्या ॥ ४॥

इदानीं समवृत्ताध्यायमभिधातुमाह ॥ गः गुरुर्यदि पादेपादे एकैको वर्णो भवति तदा उक्तायां जातौ श्रीनाम वृत्तं भवति ॥ १ ॥ पादेपादे द्वौ गकारौ यदि भवतस्तदा अत्युक्तायां जातौ स्त्रीनाम छंदो भवति ॥ २ ॥ पादेपादे एकैको मगणो यदि भवति तदा मध्यायां जातौ नारीनाम छन्दः । गे रगणो यदि भवति तदा मध्यायां जातौ मृगीनाम छन्दः ॥ ३ ॥ एवं यावंतश्छन्दोभेदा भवंति तावंत एवमवतार्याः । म्गौ मगणगुरू चेद्यदि भवतस्तदा प्रतिष्ठायां जातौ कन्यानाम छन्दः ॥ ४ ॥

सुप्रतिष्ठा ॥ भ्गौ गिति पंक्तिः ॥ ५ ॥
गायत्री । त्यौ स्तस्तनुमध्या । शशिवदना
न्यौ त्सौ चेद्वसुमती ॥ ६ ॥

भ्गौ भगणो द्वौ गुरू च भवत इति सुप्रतिष्ठायां जातौ पंक्तिर्नामच्छन्दः ॥ ॥ ५ ॥ त्यौ तगणयगणौ यदि स्तस्तदा गायत्र्यां जातौ तनुमध्या । न्यौ नगणयगणौ यदि तदा शशिवदना । चेद्यदि त्सौ तगणसगणौ भवतस्तदावसुमती ॥ ६

उष्णिक् । मधु यदि ननगाः । कुमारललिता ज्सौ ग् । म्सौगः स्यान्मदलेखा ॥ ७ ॥

यदि ननगाः द्वौ नगणौ गुरुश्च भवति तदा उष्णिहि जातौ मधुसंज्ञं भवति । ज्सौग् जगणसगणौ गुरुश्च कुमारललिता । म्सौगः मगणसगणौ गुरुश्च यदा भवति तदा मदलेखा ॥ ७ ॥

अनुष्टुप् ॥ भौ ग्गिति चित्रपदा गः । मो मो गो गो विद्युन्माला॥माणवकं भात्तलगाः । म्नौ गौ हंसरुतमेतत् । जौ समानिका गलौ च । प्रमाणिका जरौ लगौ । वितानमाभ्यां यदन्यत्॥८॥

अथानुष्टुब्जातौ भौग्ग द्वौ मगणौ गुरुद्वयं च यदा भवति तदा चित्रपदानाम । मो मो गो गो द्वौ मगणौ द्वौ गुरू च विद्युन्माला छन्दः । भाद्भगणात् परे तलगाः तगणलघुगुरवो यदि भवंति तदा माणवकं छंदः । मगणनगणौ द्वौ गुरू चेत्तत् हंसरुतं नाम छंदः रगणजगणौ गुरुलघू च यदि भवतस्तद समानिकानाम छंदः । जगणरगणौ लघुगुरू च तदा प्रमाणिकानाम छन्दः । आभ्यां समानिकाप्रमाणिकाभ्यां यदन्यल्लक्षणं तद्वितानं नाम छन्दो भवति ॥८॥

बृहती । रान्नसाविह हलमुखी । भुजगशिशुभृता नौ मः ॥ ९ ॥

अथ बृहत्यां जातौ रात् रगणात्परौ नसौ नगणसगणौ यदि भवतस्तदा हलमुखीनाम छंदः । इहास्मिन् शास्त्रे द्वौ नगणौ मगणश्च यदि भवति तदा भुजगशिशुभृतानाम छंदो भवति ॥ ९ ॥

पंक्तिः । म्सौ ज्गौ शुद्धविराडिदं मतम् । म्नौ य्गौचेति पणवनामेदम् । जौ रगौ मयूरसारिणी स्यात् । भ्मौ सगयुक्तौ रुक्मवतीयम् । ज्ञेया

मत्ता मभसगयुक्ता । चंपकमाला चेद्भमसाद्गः ।
नरजगैर्भवेन्मनोरमा ॥ १० ॥

पंक्त्यां जातौ म्सौ मगणसगणौ ज्गौ जगणगुरू च यदि भवतस्तदा शुद्धविराडिति मतमभिप्रेतम् । मगणनगणौ यगणगुरू च यदा भवतस्तदा पणवनामकं छंदः । रगणजगणौ रगणगुरू च यदि भवतस्तदा मयूरसारिणी नाम छंदः स्यात् । भगणमगणौ सगणगुरुभ्यां युक्तौ यदि भवतस्तदा रुक्मवतीयं भवति । मभसगाः मगणभगणसगणगुरवस्तैर्युक्ता यदा भवति तदा मत्ता ज्ञेया । भगणमगणसगणाश्चेद्यदिगुरुः भवति तदा चंपकमालानाम छंदः । नगणरगणजगणगुरुभिर्युक्ता यदि भवेत्तदा मनोरमा भवति ॥ १० ॥

त्रिष्टुप् ॥ त्जौ ज्गौ गुरुणेयमुपस्थितोक्ता । स्या-
दिन्द्रवज्रा यदि तौ जगौगः । उपेंद्रवज्रा जतजा-
स्ततो गौ । अनंतरोदीरितलक्ष्मभाजौ पादौ
यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि
मिश्रितासु स्मरंति जातिष्विदमेव नाम ॥ सां-
द्रपदं भ्तौ नगलघुभिश्च । नजजलगैर्गदिता
सुमुखी । दोधकवृत्तमिदं भभभाद्गौ । शालिन्यु-
क्ता म्तौ तगौ गोब्धिलोकैः । वातोर्मीयं गदिता
म्तौ तगौ गः । पंचरसैः श्रीर्भतनगगैः स्यात् ।
म्भौ न्लौ गः स्याद्भ्रमरविलसिता । रान्नराविह
रथोद्धता लगौ । स्वागतेति रनभाद्गुरुयुग्मम् ।
ननसगगुरुरचिता वृत्ता । ननरलघुगुरुभिश्च भ-
द्रिका । श्येनिका रजौ रलौ गुरुर्यदा । उपस्थि-
तमिदं ज्सौ ताद्गकारौ ॥ ११ ॥

त्रिभिः जातौ तगणजगणौ जगणगुरू च गुरुणा कृत्वा यदि तदेयमुपस्थिता उक्ता कथिता । द्वौ तगणौ जगणगुरू गुरुश्च यदि भवति तदा इंद्रवज्रानाम छंदः स्यात् । जतजा जगणतगणजगणास्ततोऽग्रतो गुरू द्वौ च यदि भवतस्तदा उपेंद्रवज्रा भवति । अनंतरशब्दे पाश्चात्त्यवृत्तद्वयमिंद्रवज्रोपेंद्रवज्राख्यं गृह्यते अनंतरमुदीरितमनंतरोदीरितमनंतरोदीरितं तच्च लक्ष्म तद्भजतः अनंतरोदीरितलक्ष्मभाजौ यौ यदीयौ पादौ यस्या इमौ यदीयौ ता उपजातय उच्यंते । इत्थमनेन प्रकारेण अन्यास्वपि जातिषु मिलितासु पूर्वाचार्या इदमेव नाम स्मरंति । यथा कुमारसंभवे प्रथमसर्गे उपजातिश्छंदः । "अस्त्युत्तरस्यां दिशि देवतात्मा" अत्र प्रथमपादे इंद्रवज्रा । "हिमालयो नाम नगाधिराजः" इत्यत्रोपेंद्रवज्रा । एवं तृतीयचतुर्थचरणयोरप्यवगन्तव्यम् । भ्तौ भगणतगणौ नगलघुभिः नगणगुरुलघुभिश्च सांद्रपदं नाम छंदः । नजजलगैः नगणजगणजगणलघुगुरुभिस्तदा सुमुखी गदिता कथिता । भमभाद्गणाद्यौ गुरू यदि भवतस्तदा इदं दोधकं वृत्तं स्यात् । मततगणादग्रे द्वौ गुरू भवतोऽब्धिलोकैश्चतुःसप्तभिरक्षरैर्यतिर्विधेया तदा शालिनी उक्ता । अत्र छंदसि चतुर्वर्णेभ्यः एका यतिः कार्या ततः सप्तवर्णेभ्यो द्वितीया यतिर्विधेया । परमत्र यदि यतिर्न स्यात्तदा छंदोप्यलीकः । मगणतगणौ तगणगुरू गुरुश्च इयं वातोर्मी । पंचरसैः पंचभिः षड्भिश्च यतिर्भवति मतनगगैः मगणतगणनगणैर्गुरुभ्यां तदा श्रीर्नाम छंदः स्यात् । मगणभगणौ नगणलघुगुरवश्च भवंति तदा भ्रमरविलसिता स्यात् । इह छंदोजातौ रात् रगणान्नरौ नगणरगणौ लघुगुरू च भवतस्तदा रथोद्धता नाम । रनभात् रगणनगणभगणाद्यदि गुरुयुग्मं भवति तदा स्वागता भवति भगणभगणसगणगुरुगुरुभी रचिता वृत्ता नाम छंदः रगणजगणौ रगणलघुगुरवश्च यदा एवं तदा स्येनिका नाम छंदः । जगण सगणौ ततः तगणात्परौ गुरू च भवतस्तदा उपस्थितमिदं छंदः ॥ ११ ॥

जगती । चंद्रवर्त्म गदितं तु रनभसैः । जतौ तु वंशस्थमुदीरितं जरौ । स्यादिंद्रवंशा ततजैरसंयुतैः । इह तोटकमंबुधिसैः प्रथितम् । द्रुतविलं-

बितमाह न भौ भरौ । वसुयुगविरतिर्नौ म्यौ पुटोऽयम् । प्रमुदितवदना भवेन्नौ ररौ । नयसहितौ न्यौ कुसुमविचित्रा । रसैर्जसजसा जलोद्धतगतिः । भुजंगप्रयातं भवेद्यैश्चतुर्भिः । रैश्चतुर्भिर्युता स्रग्विणी संमता । भुवि भवेन्नभजरैः प्रियंवदा । त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः । धीरैरभाणि ललिता तभौ जरौ । जजाविह मौक्तिकदाम जजौ च। त्यौ त्याविति निर्दिष्टा पुष्पविचित्रा । विभावरी तु सा जरौ जरौ यतः। प्रमिताक्षरा सजसजैरुदिता । ननभरसहिताभिहितोज्ज्वला । पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ । अब्ध्यंगैः स्याज्जलधरमाला म्भौ स्मौ । इह नवमालिनी नजभरौ म्यौ। स्वरशरविरतिर्ननौ रौ प्रभा । भवति नजावथ मालती जरौ इति वदतामरसं नजजाद्यः ॥ १२ ॥

जगत्यां जातौ रश्च नश्च भश्च सश्च रनभसा रगणनगणभगणसगणास्तैश्चेंद्रवर्त्म गदितं कथितम् । जश्च तश्च जतौ जगणतगणौ तु पुनः जरौ जगणरगणौ यदि भवतस्तदा वंशस्थं नाम छन्दः उदीरितं कथितम्।तगणनगणजगणैः रगणसंयुक्तैः इन्द्रवंशा स्यात् । इह छन्दोजातौ अंबुधिसैश्चतुःसगणैः तोटकं प्रथितम् । नश्च भश्च नभौ नगणभगणौ भरौ भगणरगणौ च भवतस्तदा द्रुतविलंबितमाह । नौ नगणनगणौ म्यौ मगणयगणौ च यत्र वसवोऽष्टौ युगानि चत्वारि तैर्यति यस्मात्सोऽयं पुटो नाम छन्दः।नौ नगणनगणौ ररौ रगणरगणौ च यत्र भवतः सा प्रमुदितवदना भवेत् । न्यौ नगणयगणौ नगणयगणसंयुक्तौ यत्र सा कुसुम-

विचित्रा । रसैः षड्भिर्यतिः जसजसा जगणसगणजगणसगणैः रचिता या सा जलोद्धतगतिर्नाम छन्दः । चतुर्भिर्यैर्यगणैर्भुजंगप्रयातं नाम छन्दो भवेत् । चतुर्भिः रैः रगणैः स्रग्विणी संमता कथिता । नगणभगणजगणरगणैर्भुवि पृथिव्यां प्रियंवदा नाम छन्दो भवेत् । तगणयगणौ तगणयगणौ च यत्र सा मणिमाला नाम परं गुहवक्त्रैः छिन्ना गुहः कार्तिकेयस्तस्य वक्त्राणि मुखानि षट् तत्संख्यया यतिर्विधेया तगतभगणौ जगणरगणौ च यत्र सा धीरैर्मनीषिभिः ललिता अभाणि । चत्वारो जगणा यत्र तत् मौक्तिकदाम छंदः इह अस्मिन्-शास्त्रे स्यात् । तगणयगणौ तगणयगणौ च इत्यनेन प्रकारेण यत्र सा मुनिना पुष्पविचित्रा निर्दिष्टा कथिता । जगणरगणौ तु पुनः जगणरगणौ यतो भवतः । सा विभावरी नाम। सगणजगणसगणजगणैः प्रमिताक्षरा नाम उदिता कथिता । नगणनगणमगणरगणसहिता । या सा उज्ज्वला अभिमता । द्वौ मगणौ ततो द्वौ यगणौ यत्र सा वैश्वदेवी परन्तु पंचाश्वैश्छिन्ना पंचाक्षरैः प्रथमा यतिः ततोऽश्वैः सप्तभिर्द्वितीया यतिः कार्या । अब्धयश्चत्वारोंगान्यष्टौ तैर्विरामो यत्र मगणभगणौ सगणमगणौ च स्याच्च सा जलधरमाला नाम छन्दः । नगणजगणाभ्यां परौ भगणयगणौ यदि स्तस्तदा इह छन्दोजातौ नवमालिनी भवति । स्वरैः सप्तभिस्ततः शरैः पंचभिर्विरतिर्विरामो यत्र च द्वौ नगणौ द्वौ रगणौ च भवतः सा प्रभा नाम छन्दः । नगणजगणौ अथ जगणरगणौ यत्र स्तः सा मालती नाम भवति । नगणजगणजगणात्परो यगणः स्यात्तदा इति तामरसं नाम त्वं वद कथय ॥ १२ ॥

अतिजगती । तुरगरसयतिर्नौ ततौ गः क्षमा ।
म्नौ त्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ चतुर्ग्रहैरिह
रुचिरा ज्भौ सरौ गः । वेदै रंध्रैर्म्तौ यसगा मत्त-
मयूरम् । सजौ जतौ गो भवति मंजुभाषिणी ।
ननततगुरुभिश्चंद्रिकाश्वर्तुभिः ॥ १३ ॥

अथातिजगतीजातिः । तुरगरसयतिः सप्तषड्भिर्विरामः स्याद्यत्र द्वौ नगणौ द्वौ तगणौ गुरुरेकश्च सा क्षमा नाम छन्दः । मगणनगणौ जगणरगणौ गुरुश्च त्रिदशयतिः त्रिभिरक्षरैस्ततो द्वितीयो दशाक्षरैर्विरामः इयं प्रहर्षिणी नाम छंदः । जगणभगणौ सगणरगणौ गुरुश्च एभिः रुचिरा नाम छंदः । इह छंदसि चतुर्भिरक्षरैः प्रथमा यतिः ततो ग्रहैर्नवभिरक्षरैर्द्वितीया यतिः कार्या।वेदैश्चतुर्भिरक्षरैः रंध्रैः नवभिर्यतिः मगणतगणौ यगणसगणगुरुभिः सह यत्र च तत् मत्तमयूरं छंदः । जतौ जगणतगणौ सजौ सगणजगणौ गो गुरुश्च यत्र सा मंजुभाषिणी भवति। नगणनगणतगणतगणगुरुभिश्चंद्रिका नाम छंदः परमर्त्वैः सप्तभिस्ततः ऋतुभिः षड्भिर्यतिः कार्या ॥ १३ ॥

शक्करी । म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा । ननरसलघुगैः स्वरैरपराजिता । ननभनलगिति प्रहरणकलिता । उक्ता वसंततिलका तभजा जगौ गः सिंहोद्धतेयमुदिता मुनिकाश्यपेन । उद्धर्षिणीति गदिता मुनिशैतवेन श्रीपिंगलेन कथिता मधुमाधवीति ॥१॥ इंदुवदना भजसनैः सगुरुयुग्मैः ॥ द्विःसप्तच्छिदलोला म्सौ म्भौ गौ चरणे चेत् ॥ १४ ॥

अथ शक्र्यां चतुर्दशाक्षरायां जातौ मगणतगणौ नगणसगणौ द्वौ गुरू च-तदाऽसंबाधा नाम छंदः । अत्र अक्षैरिंद्रियैः पंचभिः ग्रहैर्नवभिर्यतिः कार्या । नगणनगणरगणसगणलघुगुरुभिरपराजिता नामः छंदः अत्र स्वरैः सप्तभिर्यतिः कार्या । द्वौ नगणौ भगणनगणौ लघुगुरू च इत्यनया रीत्या । प्रहरणकलिका नाम छंदः । तगणभगणजगणजगणा द्वौ गुरू च एभिर्वसंततिलका उक्ता । मतांतरमाह । इयं वसंततिलका काश्यपेन मुनिना सिंहोद्धता उदिता भणिता । तथा शैतवेन मुनिना इयमुद्धर्षिणी निगदिता । श्रीपिंगलेनाचार्येणेयं मधुमाधवी-

ति कथिता । एवं च रूपाण्यपि मतानि । भगणजगणसगणनगणैर्गुरुयुग्म-सहितैरिंदुवदना स्यात् । चेद्यदि चरणे पादे मगणसगणौ मगणभगणौ द्वौ गुरू च तदा अलोला नाम छंदः ॥ अत्र द्विःसप्तच्छित् द्वौ वारौ सप्तभिः सप्तभिः छित् छेदो यतिर्विराम इति ॥ १४ ॥

अतिशक्करी । द्विहतहयलघुरथगिति शशिकला स्त्रीगिति भवति रसनवकयतिरियम् । वसुमु-नियतिरिह मणिगुणनिकरः । मा बाणा यस्यां सा कामक्रीडा ज्ञातव्या । ननमययुतेयं मा लिनी भोगिलोकैः । भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ सजना नयौ शरदशकविरतिरेला म्रौ म्यौ यांतौ भवेतां सप्ताष्टकैश्चंद्रलेखा ॥१५॥

अथ पंचदशाक्षरायां शक्वर्यां जातौ द्विहता द्वाभ्यां गुणिता हयाः सप्त-जाताश्चतुर्दश प्रागेव तावंतो लघवस्तदनु एको गुरुरित्यमुना प्रकारेण शशिकला नाम छंदो भवति।इयं शशिकला यदि रसनवकयतिः षड्नवभिर्यतिस्तदेत्यनया रीत्या स्रग् नाम भवति । इह अस्यां शशिकलायामष्टसप्तभिर्यतिस्तयं मणि-गुणनिकरः स्यात् । मा बाणाः पंच मगणाः यस्यां सा कामक्रीडा संज्ञा ज्ञातव्या ॥ द्वौ नगणौ एको मगणो द्वौ यगणौ च एभिर्युता इयं मालिनी अस्यां भोगिलोकैः अष्टभिः सप्तभिश्च यतिर्विधेया । नगणजगणौ भगण जगणौ रगणसहितौ तदा प्रभद्रकं नाम छंदो भवति सगणजगणनगणाः नगणयगणौ च भवतो यत्र शरदशकविरतिः पंचभिस्ततो दशभिर्वर्णैर्यतिर्भवति सा एला संज्ञा स्यात् । मगणरगणौ मगणयगणौ यगणांतौ यदि भवेतां यतिश्च सप्तभिरष्टभिरक्षरैर्भवेत्तदा चंद्रलेखा संज्ञा स्यात् इत्यतिशक्करी-जातिः ॥ १५ ॥

अष्टिः । भ्रत्रिनगैः स्वरान्नवमृषभगजविलसितम् । नजभजरैः सदा भवति वाणिनी गयुक्तैः । जरौ जरौ जगाविदं वदंति पंचचामरम् ॥ १६ ॥

अथ अष्टिजातिस्तत्र भ्रत्रीति । भ्रौ भगणरगणौ त्रिनं नगणत्रितयं ततो गो गुरुरेकः एभिः ऋतभगजैर्विलसितं नाम छंदोत्र स्वरात्सप्तम्यः नवं यतिः । नगणजगणभगणजगणरगणैर्गुरुसहितैः तदा वाणिनी नाम छंदो भवति । जगणरगणौ जगणरगणौ जगणगुरू च एतैरिदं छंदः पंचचामरं नाम छंदोविदः वदंति कथयंति ॥ १६ ॥

अत्यष्टिः। रसै रुद्रैश्छिन्ना यमनसभला गः शिखारिणी । जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः । दिङ्मुनिवंशपत्रपतितं भरनभलगैः । रसयुगहयैर्न्सौ म्रौ स्लौ गो यहा हरिणी तदा । मंदाक्रांता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् । यदि भवतो नजौ भजजला गुरुर्नर्कुटकम् । मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम् ॥१७॥

अथ अत्यष्टिजातिस्तत्र रसैः षड्भिस्ततो रुद्रैरेकादशभिश्छिन्ना विरतिर्यत्र च यगणमगणनगणसगणभगणलघवो गुरुश्च सा शिखरिणी स्यात् । जगणसगणौ जगणसगणयगणलघवो गुरुश्च यत्र सा पृथ्वी नाम छंदः । अत्र अष्टभिस्ततो नवभिर्यतिः कार्या भगणरगणनगणभगणनगणलघुगुरुभिर्वंशपत्रपतितं नाम छंदोऽत्र दशभिस्ततः सप्तभिर्यतिः । षड्भिस्ततश्चतुर्भिस्ततः सप्तभिर्यतिर्यदा नगणसगणौमगणरगणौ सगणलघू गुरुश्च तदा हरिणीनाम छंदः स्यात् । चेद्यदि जलधिभिश्चतुर्भिः षड्भिः अंगैः सप्तभिः यतिः मगणभगणौ नगणतगणौ तात् तगणात् गुरू च स्यातां तदा मंदाक्रांता नाम छंदः । :यदि नगणजगणौ

भवतः भगणजगणजगणलघवो गुरुश्च स्यात्तदा नर्कुटकं नाम छंदः । इदं नर्कुटकं यदि मुनिगुहकार्णवैः मुनिभिः सप्तभिः गुहकैरिति गुहः कार्तिकेयस्तस्य कानि मुखानि षट् तैर्गुहकैः षड्भिः अर्णवैश्चतुर्भिश्च कृता यतिर्यत्र समुनिगुहकार्णवैः कृतयतिस्तं तदा त्वं कोकिलकं नाम छंदः कथय ॥ १७ ॥

धृतिः । स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥ १८ ॥

धृतिर्नाम जातिस्तत्र यत्र भूतर्त्वश्वैः पंचषट्सप्तभिर्यतिः मगणतगणौ नगण यगणौ द्वौ यगणौ च सा कुसुमितलतावेल्लिता स्यात् ॥ १८ ॥

अतिधृतिः । रसर्त्वश्वैर्यौ म्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात् । सूर्याश्वैर्मसजस्ततायः सगुरवः शार्दूलविक्रीडितम् ॥ १९ ॥

अथ अतिधृतिर्जातिः । यमनसररगणगुरुयुता मेघविस्फूर्जितास्यात् । रसैः षड्भिः अश्वैः सप्तभिः कृतविरामा । सूर्याश्वैः द्वादशसप्तभिः कृतविरामं मसजसत तगणा गुरुसहिता यत्र तत् शार्दूलविक्रीडितं नाम छंदः स्यात् ॥ १९ ॥

कृतिः । ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना । त्री र्जौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥ २० ॥

अथ कृतिजातौ मरभनयगणसहिता भगणलघू गुरुश्च यत्र सप्ताश्वषड्भिर्यतिः सप्तभिः अश्वैः सप्तभिः षड्भिः यतिः सा सुवदना ज्ञेया । त्रिस्त्रीन् वारान् रगणजगणौ ततो गुरुलघू इह ईदृशेन लक्षणेन वृत्तनाम छन्दो भवेत् ॥ २० ॥

प्रकृतिः । म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ २१ ॥

अथ प्रकृतिजातौ मरभनगणैस्ततो यानां त्रयेण यगणत्रयेण इयं स्रग्धरा कीर्तिता । किंभूता स्रग्धरा त्रिमुनियतियुता सप्तभिस्ततः सप्तभिस्ततः सप्तभिर्विरामसहिता ॥ २१ ॥

आकृतिः भ्रौ नरना रनावथ गुरुर्दिगर्कविरमं हि भद्रकमिदम् ॥ २२ ॥

अथ आकृतिजातौ भगणरगणौ ततो नगणरगणनगणास्ततो रगण नगणौ अथ गुरुरिदं भद्रकं नाम छन्दः । किंभूतं दिगर्कविरमं दशभिर्द्वादशभिश्च विरामो यत्र तत् । अत्र हि पादपूरणे ॥ २२ ॥

विकृतिः । यदिह नजौ भजौ भ्जभलगास्तदा-श्चललितं हरार्कयति तत् मत्ताक्रीडं मौ भ्नौ नौ न्लौ गिति भवति वसुशरदशयतियुतम् ॥२३॥

अथ विकृतिर्जातिः । यदिह शास्त्रे नगणजगणौ भगणजगणभगणजगण-भगणलघुगुरुश्च स्युस्तत् अश्वललितं नाम छंदः । किंभूतं तत् हरार्कयति । हरैरेकादशभिरर्कैर्द्वादशभिर्यतिर्विरामो यत्र तत् । द्वौ मगणौ मगणनगणौ द्वौ गणौ नगणलघू गुरुश्च इति लक्षणेन मत्ताक्रीडं नाम । कीदृशं मत्ताक्रीडं वसु-शरदशयतियुतमष्टपंचदशभिर्यतिस्तया सहितम् ॥ २३ ॥

संकृतिः । भूतमुनीनैर्यतिरिह भतनाः स्मौ भन-याश्च यदि भवति तन्वी ॥ २४ ॥

अथ संकृतिर्जातिः । इह छन्दोजातौ भतनाः स्मौ भनयाश्च एते गणा यदि भवेयुस्तदा तन्वी नाम छंदो भवति । अत्र पंचसप्तद्वादशभिर्यतिः कार्याः ॥ २४ ॥

अभिकृतिः । क्रौंचपदा भ्मौ स्मौ ननना न्गा-विषुशरवसुमुनिविरतिरिह भवेत् ॥ २५ ॥

अथ अभिकृतिर्जातिः । इह शास्त्रे चेद्यदि भगणभगणौ सगणभगणौ चत्वारो नगणा एको गुरुश्च इषुभिः शरैः पंचभिः वसुभिरष्टभिर्मुनिभिः सप्तभिश्च विरतिः स्यात्तदा क्रौंचपदा नाम छन्दो भवेत् ॥ २५ ॥

उत्कृतिः । वस्वीशाश्वच्छेदोपेतं ममतनयुगन-
रसलगैर्भुजंगविजृंभितम् । मो नाः षट् सगि-
ति यदि नवरसरसशरयतियुतमपवाहाख्यम् ॥२६॥

अथ उत्कृतिजातौ ममतगणास्ततो नयुगं नगणयुगलं ततो नरसगणलघु-गुरवः एतैर्भुजंगविजृंभितं नाम छंदो भवति । कीदृशं तत् वस्वीशाश्वच्छेदो-पेतमष्टैकादशसप्तभिश्छेदो विरामस्तेनोपेतं युक्तम् । एको मगणस्ततो नगणाः षट् ततः सगणस्ततो गुरुद्वयमित्यमुना प्रकारेण यदि नवषट्षट्पंचभिर्यतिस्तया युतमुपेतं तदा अपवाहाख्यं नाम छंदः स्यात् ॥ २६ ॥

इति समवृत्तप्रकरणम् ।

यदीह नयुगलं ततः सप्त रेफास्तदा चंडवृष्टि-
प्रयातो भवेद्दंडकः ॥ १ ॥

अथ चंडवृष्ट्यादिकदंडकानाह ॥ यदीहेति । यदि इह दंडकजातौ आदौ नयुगलं नगणयुगम् ततः सप्तः रेफाः सप्त रगणास्तदा चंडवृष्टिः दंडको भवेत् चत्वारोपि पादा ईदृशेन लक्षणेन कर्तव्याः ॥ १ ॥

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूत-
लीलाकरोद्दामशंखादयः ॥ २ ॥

तथात्र प्रतिचरणविवृद्धरेफा इति । दंडकं दंडकं प्रति पादेपादे एकैकर-गणवृद्धिःक्रियते तदा अमूनि नामानि दंडकानां पृथक् स्युः । आदौ सर्वत्र नगण द्वयमेव कार्यम् तथा च द्वौ नगणौ ततःसप्त रगणाः अत्र तु द्वौ नगणौ पादेपादे ततः अष्टौ रगणास्तदा अर्णनाम दंडकं स्यात् । एवं प्रतिदंडकवृद्धौ नव-भिरर्णवनाम दशभिः रगणैर्व्यालः एकादशभिःरगणैर्जीमूतनाम द्वादशभिःरगणै-

लीलाकरः त्रयोदशभिः रगणैरुद्दामः तथा पादेपादे आदौ द्वौ नगणौ ततश्चतुर्दश रगणास्तदा शंखो नाम दंडको भवति आदिशब्दात्पथ (?) गगनसमुद्रादयोपि शिष्ट कृतनामानो गृह्यंते रगणवृद्धिरपि कर्तव्या ॥ २ ॥

प्रचितकसमभिधो धीरधीभिः स्मृतो दंडको नद्वयादुत्तरैः सप्तभिर्यैः ॥ ३ ॥

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदसि समवृत्ताध्यायस्तृतीयः समाप्तः ॥ ३ ॥

तथा नगणद्वयादुत्तरैरग्रेतनैः सप्तभिर्यैर्यगणैःधीरधीभिः पंडितैः प्रचितकसमभिधो नाम दंडकः स्मृतः कथितः ॥ ३ ॥ इति दंडकाः ॥

इति वृत्तरत्नाकराख्ये छंदसि टीकायां समवृत्ताध्यायस्तृतीयः ॥ ३ ॥

विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकाबुपचित्रम् ॥ १ ॥ भत्रयमोजगतं गुरुणी चेत् युजि च नजौ ज्ययुतौ द्रुतमध्या ॥ २ ॥

इदानीमर्धसमवृत्ताध्यायो व्याख्यायते ॥ विषमे दले प्रथमतृतीये पादे यदि द्वौ सगणौ ततः सगणलघुगुरवो भवंति पुनर्यदा युजि समे दले द्वितीयचतुर्थपादे द्वौ भौ भगणौ ततो भात्भगणात् द्वौ गुरू भवतस्तदा उपचित्रं नाम छंदः । अत्र तृतीयपादः प्रथमपादसदृशः चतुर्थपादो द्वितीयपादसदृशः एवं सर्वत्रार्धसमच्छंदसि ज्ञेयम् ॥ १ ॥ चेद्यदि ओजगतं विषमपादोत्पन्नं लक्षणं भगणत्रयं प्रथमं ततो गुरुणी गुरुद्वयं च पुनः युजि समे पादे नगणजगणौ जगणयगणसहितौ भवेतां तदा द्रुतमध्या नाम छंदो भवति ॥ २ ॥

सयुगात्सगुरू विषमे चेद्भाविह वेगवती युजि भाद्गौ ॥ ३ ॥

विषमे पादे सगणयुग्मात्सगणगुरू चेद्यदि भवतः इह युजि समे पादे भौ भगणौ ततः पुनर्भगणात् द्वौ गुरू यदि भवतस्तदा वेगवती नाम छंदो भवति॥३॥

ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ भद्रविराड् भवेदनोजे ॥ ४ ॥

ओजे विषमे पादे तगणात्परौ जगणरगणौ गुरुश्चेद्भवति अनोजे समे पादे मसौजगणगुरू च तदा भद्रविराट् नाम छंदो भवेत् ॥ ४ ॥

असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्रः ॥ ५ ॥ आख्यानकी तौ जगुरू च ओजे जतावनोजे जगुरू गुरुश्चेत् ॥ ६ ॥

असमे विषमे पादे सजौ सगणजगणौ सगणगुरू ताभ्यां युक्ता भवेत्तां समे पादे भगणरगणनगणगुरवः एभ्यः पुनर्गुरुरेको यदि भवति तदा केतुमती नाम छंदः स्यात ॥ ५ ॥ ओजे विषमे पादे तौ द्वौ तगणौ जगुरू जगणगुरू पुनरनोजे समे पादे जगणतगणौ ततो जगणगुरू पुनरेको गुरुश्चेत्तदा आख्यानकी नाम छन्दः ॥ ६ ॥

जतौ जगौ गो विषमे समे स्यात् तौ ज्गौ ग एषा विपरीतपूर्वा ॥ ७ ॥

विषमे पादे जगणतगणौ जगणगुरू गुरुश्च पुनः समे पादे तौ द्वौ तगणौ जगणगुरू गुरुरेकश्च स्यात् तदा एषा विपरीतपूर्वा विपरीताख्यानकी भवति ॥ ७ ॥

सयुगात्सलघू विषमे गुरुर्युजि नभौ च भरौ हरिणीप्लुता ॥८॥ अयुजि ननरला गुरुः समे न्जमपरवक्त्रमिदं ततो जरौ ॥ ९ ॥

विषमे पादे सगणयुग्मात् सगणलघू गुरुश्च पुनर्युजि समे पादे नगणभगणौ भगणरगणौ च तदा हरिणीप्लुतानाम छन्दो भवति ॥ ८ ॥ अयुजि विषमे पादे

द्वौ नगणौ. ततो रगणलघुगुरवः समे पादे नगणजगणौ ततोऽनंतरं जगणरगणौ इदमपरवक्त्रं नाम छन्दः ॥ ९ ॥

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ॥ १० ॥ वदंत्यपरवक्त्राख्यं वैतालीयं विपश्चितः ॥ पुष्पिताग्राभिधं केचिदौपच्छंदसिकं तथा ॥ ११ ॥

अयुजि विषमे पादे नगणयुगं च रेफश्च नगणयुगरेफौ ताभ्यां नगणयुगरेफतो यगणो भवति च पुनः युजि समे पादे नगणजगणौ ततो जगणरगणगुरवश्च तदा पुष्पिताग्रानाम छन्दो भवेत् ॥ १० ॥ यदिदमपरवक्त्राख्यं नाम छन्दस्तद्विपश्चितः पंडिता वैतालीयं वदंति कथयंति पाश्चात्त्यं पुष्पिताग्राभिधं छन्दो भवेत् ततः केचिदाचार्या औपच्छन्दसिकं वदंति ॥ ११ ॥

स्यादयुग्मके रजौ रजौ समे तु जरौ जरौ गुरुर्यदा यवान्मतीयम् ॥ १२ ॥

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदसि अर्द्धसमवृत्तरूपश्चतुर्थोऽध्यायः ॥ ४ ॥

अयुग्मके विषमे पादे रगणजगणौ ततो रगणजगणौ तु पुनः समे पादे जगणरगणौ ततो जगणरगणौ गुरुश्च तदा इयं यवाद्यवशब्दात्परा मती यवमतीत्यर्थः ॥ १२ ॥

इति वृत्तरत्नाकराख्ये छन्दसि टीकायां अर्धसमवृत्तरूपश्चतुर्थोऽध्यायः ॥ ४ ॥

मुखपादोऽष्टभिर्वर्णैः परेस्मान्मकरालयैः क्रमाद्वृद्धाः ॥ सततं यस्य विचित्रैः पादैः संपन्नसौंदर्यं तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥ १ ॥

अथ विषमवृत्ताध्यायो व्याख्यायते । मुखपाद । इति यस्य वृत्तस्य मुखपाद आदिपादोऽष्टभिर्वर्णैः अस्मात् मुखपादात्परे अग्रेतनास्त्रयः पादा मकरालयैश्चतु-

र्भिरक्षरैः क्रमात् क्रमेण वृद्धा भवंति द्वितीयपादो द्वादशभिरक्षरैः तृतीयः पादः षोडशाक्षरैश्चतुर्थो विंशत्यक्षरैः अमलधीभिः पंडितैस्तत् पदचतुरूर्ध्वाभिधं वृत्तमभिहितं भणितं किंभूतं तत् सततमनवरतं यस्य वृत्तस्य विचित्रैः नानाविधैः पादैः संपन्नसौंदर्यं जातचारुत्वम् ॥ १ ॥

प्रथममुदितवृत्ते विरचितविषमचरणभाजि गुरुकयुगलनिधनेऽइह कलित आडा विधृतरुचिरपदवितति यतिरिति भवति पीडः ॥ २ ॥

प्रथममिति । इह शास्त्रे प्रथममुदितवृत्ते पूर्वं प्रतिपादिते वृत्ते पदचतुरूर्ध्वाभिधे वृत्ते आडा कलितः पीडो नाम छंदो भवति । आपीड इत्यर्थः । किंभूते वृत्ते विरचितान् विषमान् चरणान् पादान् भजतीत्येवंशीलः स तथा तस्मिन् । किंभूतः आपीडः गुरुयुगलं निधनेऽवसाने यस्य स तथा पुनः किंभूतः । विधृता रुचिरा पदवितती यतिर्येन स तथा भावार्थस्त्वयम् आपीडच्छंदसि सर्वं लक्षणं पदचतुरूर्ध्वाभिधयुक्तं किंतु पदे पदे प्रांते गुरुद्वयं कार्यम् ॥ २ ॥

प्रथममितरचरणसमुत्थं श्रयति जगति लक्ष्म इतरदितरजनितमपि यदि चतुर्थं चरणयुगलकमधिकृतमपरमिति कलिका सा ॥ ३ ॥

प्रथममिति । तुर्यं चतुर्थांशः पाद इत्यर्थः । यदि प्रथमं तुर्यं प्रथमपादः अष्टाक्षररूपः इतरचरणसमुत्थं द्वितीयचरणभवं द्वादशाक्षररूपं लक्ष्म लक्षणं श्रयति । इतरत्तुर्यं द्वितीयपादो द्वादशाक्षररूपः इतरजनितमपि प्रथमपादजनितमष्टाक्षररूपं श्रयति । अपरं चरणयुगलं तृतीयचतुर्थमधिकारापन्नं पूर्वोक्तं क्रमेण षोडशविंशत्यक्षरं लक्ष्म चिह्नं श्रयति इत्यनेन प्रकारेण जगति लोके तदा सा कलिकानाम छन्दः ॥ ३ ॥

द्विगुरुयुतसकलचरणांता सुखचरणरचितमनु-
भवति तृतीयः । चरण इह हि लक्ष्म प्रकृतमपरम-
खिलमपि भजति लवल्या ॥ ४ ॥

सा लवल्यानाम छंदो भवति । किंभूता । द्वाभ्यां गुरुभ्यां युतं युक्तं सकल-चरणानामंतोवसानं यस्याः तथा इहास्यां लवल्यायां हि निश्चितं तृतीयः चरणो सुखचरणरचितं प्रथमपादोद्भवं लक्ष्म अनुभवति आश्रयते । प्रकृतं प्रस्तुतमपर-मन्यदखिलं चरणत्रयं भजति ॥ ४ ॥

प्रथममधिवसति यदि तुर्यं चरमचरणपदमव-
सितगुरुयुग्मा । निखिलमपरमुपरितनसममिह
ललितपादत्रितयममृतधारा ॥ ५ ॥

प्रथममधीति । प्रथमं तुर्यं प्रथमपादोद्भाक्षरस्थो यदि चरमचरणपदं चतुर्थं पदं स्थानमधिवसति प्राप्नोति निखिलं समस्तमपरमन्यत् उपरितनसमं पार्श्वस्थ-समानं ललितपादत्रितयमिह शास्त्रे पादचतुरूर्ध्वे तदा अमृतधारानाम छन्दो भवति । किंभूता अमृतधारा अवसितेः अवसाने गुरुयुग्मे यस्याः सा अव-सितगुरुयुग्मा ॥ ५ ॥

इति पादचतुरूर्ध्वप्रकरणं समाप्तम् ।

सजमादिमे सलघुकौ च नसजगुरुकेष्वथो-
द्वृता ॥ त्र्यंघ्रिगतभनजला गयुताः जगौ चरम-
मेकतः पठेत् ॥ ६ ॥

सजमादिमे इति । आदिमे प्रथमे पादे सजं सगणजगणौ पुनः सगणलघू भवतः । अथ द्वितीये पादे नगणसगण जगणगुरुषु सत्सु उद्वृतानाम छन्दः त्रिशब्दस्तृतीये वर्तते त्रिश्चासावंघ्रिश्च त्र्यंघ्रिस्तृतीयपादस्तत्र गताश्चे ते भग-

[illegible]जगणलवौ गुरुयुताः स्युः चरमं पश्चिमं पादं सगणजगणसगणा जगणगुरू च यदि एकतः एकत्र पठेत् भणेत् तदा उद्गतानाम छंदो भवति॥१॥

चरणत्रयं भजति लक्ष्म यदि सकलमुद्गतागतं
नौ भ्रौ भवति सौरकं चरणे यदीह भवतस्तृ-
तीयके ॥ २ ॥

चरणत्रयमिति । यदि इह छन्दसि तृतीये चरणे नौ रगणनगणौ भौ भगण गुरू च भवतः अपरं तृतीयवर्ज्यं सकलं दलं चरणत्रयं यदि उद्गतागतं लक्ष्म-लक्षणं भजति तदा सौरमकं नाम छन्दो भवति ॥ २ ॥

नयुगं सकारयुगलं च भजति चरणं तृतीयकम् ।
तदुदितमुरुमतिभिर्ललितं यदि शेषमस्य खलु
पूर्वतुल्यकम् ॥ ३ ॥

नयुगमिति । यदि तृतीयकं चरणं पादं नगणद्वयं सगणद्वयं चास्य शेषमपरं पादत्रयं खलु निश्चितं पूर्वतुल्यकमुद्गतागतं लक्षणं भजति तदा उरुमतिभिः पण्डितैस्तद्वृत्तं ललितं नाम उदितमुक्तम् ॥ ३ ॥

इत्युद्गताप्रकरणं समाप्तम् ।

म्सौज्मौ गौ प्रथमांघ्रिरेकतः पृथगन्यत् त्रितयं
सनजरगास्तथा ननौ सः ॥ त्रिनपरिकलितजयौ
प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ १ ॥

म्साविति । मगणसगणौ जगणभगणौ द्वौ गुरू च एषः प्रथमांघ्रिश्चरणः एकतः प्रथमपादात्पृथगन्यदग्रेतनं पादत्रितयं किंलक्षणरूपमित्याह । सगण नगणजगणरगणगुरवो द्वितीये पादे । तथा ननौ द्वौ नगणौ सगणश्च तृतीये

पादे । त्रयश्च ते नाश्विनास्तैश्विनैः परिकलितौ युक्तौ च तौ जयौ जगणयगणौ चतुर्थे पादे यदि भवतस्तदोपस्थितपूर्वं प्रचुपितमुपस्थितप्रचुपितं नाम छंदः इदमुदितं कथितं छंदोविद्भिरिति शेषः ॥ १ ॥

नौ पादेथ तृतीयके सनौ नसयुक्तौ प्रथमांघ्रिय-
ति यदि प्रवर्धमानं त्रितयमपरमपि पूर्वसदृश-
मिह भवेत्प्रविततमतिभिरिति गदितं खलु
वृत्तम् ॥ २ ॥

नौ पाद इति । अथानंतरं तृतीयके पादे नौ द्वौ नगणौ पुनः सगणनगणौ नगणसगणयुक्तौ यदि स्तः अपरमन्यत् पादत्रितयमिह शास्त्रे पूर्वसदृशं पाश्चात्य छंदःसमानमपि निश्चितं भवेत् यदि प्रथमांघ्रौ यतिर्यस्मिंस्तत्प्रथमांघ्रियति । प्रविततमतिभिर्विस्तीर्णबुद्धिभिर्मुनिभिः खलु निश्चितमित्येवंभूतं वर्धमान छंदो गदितं कथितम् ॥ २ ॥

अस्मिन्नेव तृतीयपादके तजराः स्युः प्रथमे च
विरतिरार्षभं वदंति ॥ तच्छुद्धविराट्पुरःस्थितं
त्रितयमपरमपि यदि पूर्वसमं स्यात् ॥ ३ ॥

अस्मिन्नेवेति । अस्मिन्नेव वर्द्धमानसंज्ञके छंदसि तृतीयपादके तजराः तग-णजगणरगणाः स्युः प्रथमे च पादे विरतिः कार्या । अपरं पादत्रितयं यदि पूर्वसमं स्यात् बुधास्तद् शुद्धविराट्पुरःस्थितमार्षभं छंदो वदंति शुद्धविराडार्षभ-मित्यर्थः ॥ ३ ॥ इत्युपस्थितप्रचुपितप्रकरणम् ॥

विषमाक्षरपादं वा पादैरसमं दशधर्मवत् ॥
यच्छंदो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम् ॥ १॥

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदसि
विषमवृत्तनिरूपणाख्यः पंचमोऽध्यायः ॥ ५ ॥

विषमाक्षरेति । विषमाक्षराः पादा यस्मिंस्तद्विषमाक्षरपादं छंदः । यस्येदमेव अष्टदशसप्तनवाक्षरं पादवृत्तं तथा पादैरसमं त्रिपादं षट्पादं त्रिषट्पादभेदात् । दशवर्णवृत्तं । यथा । दश धर्मं न जानंति धृतराष्ट्र निबोध तान् । मत्तः प्रमत्त उन्मत्तः श्रांतः क्रुद्धो बुभुक्षितः । त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश । इयं खलु षट्पदी गाथा । इत्येवमादि यच्छंदोत्र नोक्तं तत्पूर्वसूरिभिरित्येषा गाथा प्रोक्ता किंनाम गाथा । गीतिका कलिका वेल्लितका द्विपदीध्रुवकौत्साहचत्वरी पदुलिकाप्रभृति तत्सर्वं गाथासंज्ञकम् ॥ १ ॥

इति वृत्तरत्नाकराख्ये छंदसि टीकायां विषमवृत्तनिरूपणाख्यः पंचमोऽध्यायः ॥ ५ ॥

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया ॥
संख्या चैवाध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥ १ ॥

प्रथमं द्वारश्लोकमाह । प्रस्तार इत्यादि । द्वाराणि अमूनि प्रस्तारः १ नष्टम् २ उद्दिष्टम् ३ एकद्व्यादिलगक्रिया ४ संख्या ५ अध्वयोगः ६ एते षट् प्रत्ययाः स्मृताः ॥ १ ॥

पादे सर्वगुरावाद्यालघुं न्यस्य गुरोरधः ॥
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २ ॥

प्रस्तारमाह । पादे सर्वेति । सर्वगुरौ पादे आद्याद्गुरोरधो लघुं न्यस्य यथा उपरि तथा शेषं समस्तमुर्वरितं भूयोभूयः पुनःपुनरप्यमुं विधिं कुर्यात् ॥ २ ॥

ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत् ॥ प्रस्तारोयं समाख्यातश्छंदोविचितिवेदिभिः ॥ ३ ॥

इति प्रस्तारः ।

ऊन इति । ऊने पश्चादूने गुरूनेव दद्यात् तावद्यावत्सर्वलघुर्भवेत् प्रस्तार्यत इति प्रस्तारः वर्णानां विस्तारो न्यासः समाख्यातः कथितः । कैः छंदांसि विचीयंतेऽस्यामिति छन्दोविचितिस्तां विदंतीति छंदोविचितिवेदिनस्तैः पंडितैः ॥

ऽ	ऽऽऽ
	।ऽऽ
।	ऽ।ऽ
	।।ऽ
ऽऽ२	ऽऽ।
।ऽ	।ऽ।
ऽ।	ऽ।।
।।	।।।

अथ प्रस्तारस्य स्थापनाप्रकारः ।

एवं संक्षेपेणोक्त्वा विस्तारमाह । पादे सर्वगुरौ इति । पादे यावंतो वर्णास्तावंतो गुरव एव लिख्यंते आदौ यथा सर्वच्छंदोजातिषु वर्णसंख्यया गुरवो लिख्यंते । प्रथमरूपजातमेतावता तथा त्र्यक्षरे छंदसि स्थापना दृश्यते द्वितीयप्रस्तारारूपे क्रियमाणे आद्याद्गुरोरधो लघुर्न्यसनीयो यथात्रैव त्रिगुणप्रस्तारे आद्यगुरोरधो लघुरस्ति तस्माद्विन्यस्तलघोरग्रतः यथोपरितनप्रस्तारे तथैव कर्त्तव्यम् । यत्रोपरि गुरुस्तत्राप्यधो गुरुः यत्रोपरि लघुस्तत्राधोपि लघुः यत्र प्रस्तारे उपरि द्वौ गुरू अधोपि तथैव भूयो भूयः अमुमेव विधिं कुर्यात् यद्युपरितनप्रस्तारे आदौ लघुर्द्वितीयो गुरुस्तदा तस्माद्वितीयादधो लघुर्न्यस्यते अग्रतो यथोपरि तथा शषविधिः कार्यः ऊने दद्याद्गुरूनेव यत्पूर्वं पाश्चात्त्यमूनं स्थानं तत्र गुरुर्दीयते अथ तृतीयाद्गुरोरधो लघुस्ततः पूर्वं द्वौ गुरू दीयेते यद्वा चतुर्थाद्गुरोरधः यदि लघुः स्यात् तदा त्रयः ऊनस्थाने दीयंते एवं तावन्मात्रः कार्यो यावत्सर्वलघुः प्रस्तारो भवेत् ॥ इति प्रस्तारविधिः । तथा चतुर्थवर्णप्रस्तारे षोडश रूपाणि लभ्यंते । स्थापना लिखितैवास्ति एवं वृत्ते यावंतो वर्णास्तावानयं प्रस्तारोपि कर्तव्यः ॥ ३ ॥

नष्टस्य यो भवेदंकस्तस्यार्धेऽर्धे समे च लः ॥ विषमे चैकमादाय तदर्धेऽर्धे गुरुर्भवेत् ॥ इति नष्टं समाप्तम् ॥ उद्दिष्टं द्विगुणादाद्युपर्यंकान् समालिखेत् ॥ लघुस्था ये तु तत्रांकास्तैः सैकैर्मिश्रितैर्भवेत् ॥ १ ॥ इति उद्दिष्टं समाप्तम् ॥

नष्टमाह । नष्टस्येति । नष्टस्य गतरूपस्य योंकः तस्यांकस्य समेऽर्धे कृते लो लघुर्लभ्यते च पुनर्विषमे एकमादाय मध्ये निक्षिप्य अर्धे कृते तदर्धे गुरुर्भवेदित्यन्वयार्थः । यथा केनापि पृष्टस्य वृत्तस्यतत्र्यक्षरजातिकस्य प्रस्तारे चतुर्थरूपं कीदृशं स्यात् । नष्टस्य चतुर्थरूपोंकः समो भवति तस्य समांकस्यार्धे कृते लघुर्लभ्यते पुनरुर्वरितौ द्वौ समौ तयोरर्धे कृतेपि लघुर्लभ्यते ततः उर्वरितः एको विषमः विषमभागं न दत्ते ततो विषमे चैकमादाय एकमध्ये क्षिप्त्वा विषमः समः कार्यः सोप्येको विषमः सैकः सन् द्वौ जातौ तदर्धे तस्य विषमांकस्य समीकृतस्यार्धे गुरुरेव लभ्यते एवं तावत्कर्तव्यं यावत्पादाक्षरप्रमाणं लभ्यते ततस्त्र्यक्षरे छंदसि चतुर्थरूपम् ।।ऽ ईदृशं भवति पुनः केनापि पृष्टं चतुरक्षरे छंदसि पंचमं रूपं कीदृशं भवति । पंचविषमास्ते सैका जाताः षट् तदर्धे विषमत्वादुरूः प्राप्यते । पुनस्त्रयो विषमाः सैका जाताश्चत्वारस्तदर्धे च गुरुर्लभ्यते ॥ उर्वरितौ द्वौ समौ तदर्धेपि च लघुः प्राप्तः पुनरुर्वरित एकोऽस्य विषमस्यार्धं न भवति ततः एकमादायार्धे कृते गुरुः प्राप्तः ततश्चतुरक्षरे छंदसि पंचमं रूपम् ऽऽ।ऽ ईदृशं भवति इत्याम्नायः ॥ १ ॥ इति नष्टविधिः । उद्दिष्टमाह । उद्दिष्टमिति । कोऽर्थः कोपि पट्टके रूपं लिखित्वा कियत्तमं रूपमिदमिति पृच्छति । इदमुद्दिष्टमुच्यते उद्दिष्टा यावंतो वर्णा लिखिताः संति तेषां मध्य आद्यमक्षरमादौ कृत्वा सर्वेषामुपरि द्विगुणितानंकान् समालिखेत् आद्यवर्णस्य मस्तके एकैको लेख्यः, ततः स्थानद्विगुणिता

अंकाः शिरसि लेख्याः कथं द्वितीयवर्णस्योपरि द्विकस्तृतीयवर्णस्योपरि चतुष्ककः चतुर्थवर्णस्योपरि अष्टको देयः पंचमवर्णस्योपरि षोडश देयाः षष्ठवर्णस्योपरि द्वात्रिंशदंका देयाः एवं तावद्यावदंत्यवर्णोपर्यंकः स्यात्तत्र यैंका गुरुरूपोपरि लिखिताः संति तैर्न कार्यम् । लघुस्थाः लघुवर्णोपर्यपि यैंकास्तत्र ते एकतो मूल्यंते एकीकृत्य पुनरेको मध्ये क्षिप्यते ततस्तैर्लघुस्थैरंकैर्मिश्रितैरेकीकृतैः सैकैरेकसहितैर्यावदंको भवेत्तावत्तममिदं रूपमिति वक्तव्यम् ॥ १ ॥ इत्युद्दिष्टस्याम्नायः समाप्तः ॥

वर्णान् वृत्तभवान् सैकानुत्तराधरतः स्थितान् ॥ एकादिकमशश्चैतानुपर्युपरि निक्षिपेत् ॥ उपांत्यतो निवर्तेत त्यजेदेकैकमूर्ध्वतः ॥ उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया ॥ २ ॥

इत्येकद्व्यादिलगक्रिया ।

एकद्व्यादिलगक्रियार्थमाह । वर्णानिति । यावंतो वृत्तभवा वर्णास्तावतः सैकान् एकसहितान् अधऊर्ध्वस्थितान् कृत्वादिक्रमेण एतानुपरि उपरि निक्षिपेत् उपांत्यतः समीपान्निवर्तेत व्यापटेत ऊर्ध्वतः एकैकं त्यजेत् । उपरि आद्यादिलगक्रिया भवतीत्यन्वयः।विस्तरमाह।छंदोविद्विर्वृत्तभवा यस्मिन् पादे यावंतो वर्णास्तावंत एकका लिख्यंते सैकान् तन्मध्ये एकः पुनर्लिख्यते उत्तराधरतः अधः ऊर्ध्वं स्थिता लिख्यंते । चतुरक्षरपादजातौ स्थापना एतानेकादिक्रमेण उपरि उपरि निक्षिपेत् । तावत् यावत् उपांत्यं ततः उपांत्यान्निवर्तेत उपांत्यं त्यजेदित्यर्थः । एकमेकमुपरि ऊर्ध्वतस्त्यजन् । आद्याद्गुरोरिति भावार्थमाह । चतुरक्षरे छंदसि आद्यमेकं वृत्तं सर्वगुरु भवति चत्वारि त्रिगुरूणि भवंति । षट् रूपाणि द्विगुरूणि भवंति एकं सर्वलघु रूपं भवति कथमित्याह ॥ ये अध ऊर्ध्वं पंच एकास्तत्र

प्रथम एको द्वितीये एकके क्षिप्यते तौ द्वौ जातौ तौ च तृतीयैकके क्षिप्येते ते त्रयो जाताः तेच चतुष्कैकके क्षिप्यन्ते चत्वारो जाताः पाश्चात्योंकः एकः कुत्रापि न लुप्यते ततः उपर्यंकमेकं त्यजन् निवर्तेत ततः पुनरपि प्रथम एको द्वितीये द्वितीयके क्षिप्यते ते त्रयो जाताः ते च तृतीये त्रिके क्षिप्यन्ते षट् जाताः । तत उपर्यंकं चतुष्कं त्यजन्निवर्तेत । प्रथमांके सर्वगुरुप्रमाणं ततः पुनरपि प्रथमेको द्वितीये त्रिके क्षिप्यते चत्वारो जाताः तत उपर्यंकं षट्कं त्यजन्निवर्तेत इतश्चतुष्कः पाश्चात्योंकः स कुत्रापि न लुप्यते ततः उपर्यंकं त्यजन्निवर्तेत तत्र प्रथमांके सर्वगुरुप्रमाणं द्वितीयांके त्रिगुरुप्रमाणं तृतीयांके द्विगुरुप्रमाणं चतुर्थेके एकगुरुप्रमाणं पंचमांके सर्वलघुप्रमाणं चोर्ध्वतो ज्ञातव्यम् अधस्ताच्च प्रथमांके सर्वलघुप्रमाणं द्वितीयांके त्रिलघुप्रमाणं तृतीयांके द्विलघुप्रमाणं चतुर्थांके एकलघुप्रमाणं चरमांके सर्वगुरुप्रमाणं च ज्ञातव्यम् ॥ १ ॥ २ ॥ इति एकद्व्यादिलगक्रिया ॥

लगक्रियांकसंदोहे भवेत्संख्याविमिश्रिते ॥
उद्दिष्टांकसमाहारः सैको वा जनयेदिमाम् ॥ १ ॥
इति संख्या ॥

संख्यामाह । लगक्रियांकेति । लगक्रियांकसंदोहे एकद्व्यादिलगक्रियायाः अंकसमूहे विमिश्रिते एकतो मिलिते तद्वृत्तप्रस्तारस्थसंख्यामिलितोंकः स यथा । चतुरक्षरजातौ एकश्चत्वारः षट्चत्वार एकश्चेते लगक्रियांका भवंति एतेषां लगक्रियांकानां मिश्रीभावे षोडश भवंति ते षोडश एव संख्या चतुरक्षरजातेः प्रस्तारस्य । पक्षांतरमाह । वाथवा उद्दिष्टांकसमाहारः उद्दिष्टवृत्तवर्णशिरसि येंकास्तेषामेकीभावः पुनरेकरहितः इमां संख्यां जनयेत् तथा चतुरक्षरे छन्दसि द्विगुणैरंकैरारोप्यमाणैः पंचदश भवंति तैः सैकैः षोडश ॥ १ ॥

संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ॥
वृत्तस्यांगुलिकीं व्याप्तिमधः कुर्यादथांगुलिम् ॥ १ ॥
इत्यध्वा ॥

अध्वानमाह । संख्यैवेति । चतुरक्षरजातौ षोडश सख्यैव सा द्विगुणाद्वात्रिंशद्भवति स सद्भिरध्वा वृत्तस्थानमार्गः कथितः । कथं वृत्तस्य वर्णांगुलिकाम् अंगुलिपरिमाणां व्याप्तिम् स्थानभूमिं कुर्यात् तथा द्वयोः प्रस्तारयोरंतराले एकत्रैवांगुलं कुर्यात् एकत्रिंशदंगुलायां भुवि एवं चतुरक्षरं छन्दः प्रस्तार्यते अथ ऊर्ध्वप्रमाणमिदं न तु दीर्घतायाः प्रमाणं तत्र प्रमाणाभावात् ॥ १ ॥ इत्यध्वा ॥ एते षट् प्रत्ययाः ॥

वंशोभूत्काश्यपस्य प्रकटगुणगणः शैवसिद्धांतवेत्ता विप्रः पव्येकनामा विमलतरमतिर्वेदतत्त्वावबोधे ॥ केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तश्छंदस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥ १ ॥

इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदःशास्त्रे प्रस्तारप्रकरणं समाप्तम् ॥

वंशोभूदिति । पव्येकनामा विप्रः काश्यपस्य वंशेऽभूत् । किंभूतो विप्रः प्रकटगुणगणः पुनः किंभूतः शैवसिद्धांतवेत्ता पुनः किंभूतः वेदतत्त्वावबोधे विमलतरमतिः तस्य पव्येकस्य केदारः शिवचरणयुगाराधनैकाग्रचित्तःसूनुरभूत् तेन केदारेण इदं वृत्तरत्नाकाराख्यं छन्दः प्रविरचितं किंभूतं छन्दः अभिरामम् ॥ १ ॥

इति वृत्तरत्नाकराख्यच्छंदसो व्याख्या समाप्ता ।

समाप्तोऽयं ग्रन्थः ।

खेमराज श्रीकृष्णदास, " श्रीवेंकटेश्वर " स्टीम् प्रेस—बंबई.

विक्रय्यछन्दो-ग्रन्थाः ।

नाम	की. रु. आ.

छन्दश्चिह्न–इसमें किस रीतिसे छन्द पृथक् २ मात्रामेलसे रचना करना यह भलीभाँति दिखलाया गयाहै ०–१

छन्दोंकुर–भाषाटीकासमेत । बूँदीनिवासि पं० गंगासहायजी विरचित ०–२

प्रस्तारादरत्नाकर–भाषाटीका अर्थात् श्लोक, छन्द, वृत्त आदिके प्रस्तारका वर्णन भलीप्रकार लिखागयाहै. ०–२

श्रुतबोधवृत्तरत्नाकर–महन्मान्य पंडितशिरोमणि श्रीकालिदास और श्रीभट्टकेदार विरचित मूल संस्कृत । इन दोनों ग्रन्थोंके अभ्यासले अनेक प्रकारके छन्द और वृत्तादि काव्यसरलरीतिसे बनासकेहैं. ०–६

श्रुतबोध–सान्वय–भाषाटीका । उपरोक्त रीतिसे भाषाटीकाके द्वारा छन्दज्ञान और भी शीघ्र होसक्ताहै. ०–३

भाषा-छन्दो-ग्रन्थाः ।

अलंकारप्रकाश–सेठ कन्हैयालाल पोद्दारप्रणीत । यह नवाविष्कृत प्रणालीसे सुगुम्फित अलंकारविषयका हिन्दीभाषाका सर्वोत्तम देखने योग्य ग्रन्थ है । जरूर संग्रह करिये. १–१२

छन्दरत्नमाला–पिङ्गल–भाषाकाव्य बनानेमें अत्यन्त उपयोगी है ... ०–२

छन्दप्रभाकर–भाषापिङ्गल–सटीक । छन्दःशास्त्रके विशेष ज्ञानोत्पत्तिके लिये बाबू जगन्नाथप्रसाद (उपनाम भानु कवि) ने निर्माण कियाहै । भाषाकाव्य बनानेवालोंके लिये अत्युपयोगी है १–१२

छन्दपयोनिधि–इस "छन्दपयोनिधि" की सुपरिपाटी देखने योग्य है. इस ग्रन्थने जैसा नाम पायाहै वैसाही इसमें गुणहै ... ०–१२

छन्दार्णवपिङ्गल–(भिखारीदासकृत) भाषाकाव्य रचना करनेमें ठीक है ०–१२

(व्याकरण-ग्रन्थाः)

नाम	की. रु. आ.
अष्टाध्यायी-(**पञ्चपाठी**) गणपाठ, धातुपाठ, वार्तिकपाठ और लिंगानुशासन । विद्यार्थियोंको परमोपयोगी है.	०-१२
अष्टाध्यायीसूत्रपाठ-इसके पढनेसे कौमुदीका जल्दी पठन होताहै.	०-३
अर्थप्रकाशिका-भाषाभाष्य। व्याकरण पढनेवालोंको अत्युपयोगी है.	०-८
कारकस्वरूप-भाषाटीकासहित । इसके द्वारा कालद्रव्यादिकका-शीघ्र बोध होताहै.	०-६
कारकवादार्थ-जयरामपंडितप्रणीत (इससे शब्दबोध, व्याकरण तथा न्यायका शब्दज्ञान होताहै)	०-२
धातुरूपावली-लघुपाठसहित । इससे धातुओंका शीघ्र बोध होताहै.	०-३
पूर्वपक्षावली-(पाणिनीयव्याकरण)	०-३
तथा उत्तरपक्षावली.	०-३
बालसंस्कृतबोधिनी-भाषाटीकासहित । यह विद्यार्थियोंको अतीव उपयोगीहै	०-६
बालकोपदेशमालिका-रंगनाथ प्रबोधन और धर्मवाद समेत संस्कृता भ्यासियोंको संस्कृतभाषाव्युत्पत्ति तथा भगवद्भक्ति और धर्मश्रद्धा होनेको यह बहुतही उत्तम गद्यपद्य काव्य है	०-४
मध्यसिद्धांतकौमुदी-टिप्पणी सहित । यह काशी तथा पंजाबादि देशोंमें प्रथमश्रेणीमें पढायी जातीहै	०-१२
रूपमाला-सम्पूर्ण सन्धिभाग, अव्ययार्थभाग, प्रयोगविधिसंग्रह, (कारकसमास तद्धितादिक) क्रियाकलाप, आख्यातचंद्रिका,	

नाम.	की. रु. आ.

धातु रूपभेद और श्लोकयोजनिकोपाय यह ग्रन्थ विद्यार्थियोंको अतीव उपयोगी है. .... १—४

निम्नलिखितानुसार अलग २ भाग भी मिलते हैं:—

रूपमाला—१—व्याकरण षड्लिंगविभाग, इससे लिंगबोध अच्छीप्रकारसे होताहै. .... ०—६

,, २—संधिविभाग—शब्दोंकी पंचसन्धि समझनेका सुलभ उपाय. .... ०—६

,, ३—अव्ययार्थभाग—इससे श्लोकादिके पदोंका अन्वय जानलेतेहैं. ... . ०—३

,, ४—प्रयोगविधिसंग्रह—कारकसमास तद्धितादिक .... ०—२

,, ५—क्रियाकलाप, धातुरूपभेद, आख्यातचंद्रिका, श्लोकयोजनिकोपायनामहीसे समझलेंगे. ... . ०—६

लघुत्रिमुनिकल्पतरु—इसमें पाणिनि आदिका वृत्तान्त भलीप्रकार है.... ०—४

लघुसिद्धान्तकौमुदी—टिप्पणी सहित जिल्द बँधी बडा अक्षर ०—१२

लघुसिद्धान्तकौमुदी—छोटा गुटका महीन अक्षर .... ०—४

लघुसिद्धान्तकौमुदी—विद्यावारिधि पंडित—ज्वालाप्रसादजीमिश्रकृत उदाहरण, स्पष्टीकरण, नियमाङ्क, योजना तथा भाषाटीका सहित .... २—०

लघुव्याकरण—पूर्वार्द्ध .... ०—३

लघुभाष्य—श्रीसरस्वतीकृत संपूर्ण व्याकरणसूत्र व्याख्यान सारस्वतके सूत्रोंपर महाभाष्यके अनुसार सर्वोत्तम व्याख्या है. ... २—८

लिङ्गबोधव्याकरण—भाषाटीकासमेत । इसके अभ्याससे पुँल्लिंग, स्त्रीलिंग, नपुंसकलिंग आदिका ज्ञान शीघ्र होताहै .... ०—२

शब्दरूपावली—एकाक्षरीकोषसहित—शब्दज्ञान और विभक्तिकी प्रथमश्रेणी की है. .... ०—१॥

नाम.	की. रु. आ.
शाकटायन व्याकरण--शाब्दिकचूडामणि श्रीशाकटायनाचार्यविरचित शब्दानुशासन अर्थात् श्रीमदभयचन्द्रसूरिप्रणीत प्रक्रियासंग्रह सहित । व्याकरण पढनेवालोंको अवश्य लेने योग्य है.	२--४
समासकुवलयाकर--नियमोंके साथ उदाहरणत्वरासे पदोंका समास करसक्ते हैं .... —	०--४
समासचक्र--नामहीसे ज्ञात होताहै	०--)॥
सारस्वततीनोंवृत्ति--मूलमात्र.	०--१०
सारस्वतमूल--पूर्वार्द्ध ग्लेज	०--८
" तथा रफ कागजका दाम.	०--९
सारस्वतप्रसादटीका	०--१२
सारस्वत सम्पूर्ण--चन्द्रकीर्तिटीकासह ग्लेज कागज	३--०
" तथा रफ	२--८
सारस्वत--चन्द्रकीर्तिटीकासह--(पूर्वार्द्ध) ग्लेज कागज	१--०
" तथा रफ	०--१४
सारस्वत--चन्द्रकीर्तिटीकासह--(उत्तरार्द्ध) ग्लेजकागज	१--१४
" तथा रफ	१--१२
सारस्वत--सुबोधिनी भाषाटीकासह (पूर्वार्द्ध मात्र) विद्यार्थी सुगम-रीतिसे समझसक्ते हैं.	१--१२
सारस्वत--(व्याकरण) श्रीमदनुभूतिस्वरूपाचार्यप्रणीत । और पंडितवर्यमाधवविब्रवणोपेत.	२--०
सिद्धान्तकौमुदी--महामहोपाध्याय भट्टोजिदीक्षित विरचितपाणिनीय-शिक्षा, परिभाषा, अष्टाध्यायी, गणपाठ, धातुपाठ, लिंगानुशासन, सूत्रपाठ, आकाराद्यनुक्रमणिका तथा धातुसूचिसमेत । थोडा दाम रक्खाहै	२--०
सिद्धान्तकौमुदी--तत्त्वबोधिनीटीकासहित सम्पूर्ण । इसके लौकिकभा-गमें--तत्त्वबोधिनी टीका, वैदिकभागमें--सुबोधिनी टीका, लिंगानुशासनमें--चन्द्रकला टीका और महामहोपाध्यायपं०	

नाम. ....

शिवदत्त विरचित टिप्पणियें संयुक्त कीगई है । तथा गणपाठ, धातुपाठ, लिंगानुशासन, पाणिनीयशिक्षा, परिभाषापाठ, सूत्र-सूची वार्तिक, गणसूत्र, परिभाषासमुचितसूची, उणादि सूत्रसूची धातुसूची, फिट्सूत्रसूची, तथा लिंगानुशासन सूचियें भी युक्त कीगई हैं । सर्वसाधारणके सुभीतार्थ दामभी थोडा रक्खाहै... ४—८

सिद्धान्तकौमुदी—केवल तत्त्वबोधिनी टीका पूर्वार्द्धमात्र. .... २—०

सिद्धान्तचन्द्रिका—मूलमात्र । इसीका प्रचार सर्वत्र .... ०—१०

सिद्धान्तचन्द्रिका—सटीक । सुबोधिनी और तत्त्वदीपिकासमेत संपूर्ण सुन्दर जिल्द. ... . ३—८

सिद्धान्तचन्द्रिका—उपरोक्त टीकाओंसमेत पूर्वार्द्ध ... . १—१२

" तथा उत्तरार्द्ध .... १—१२

सुगमकौमुदी—(प्रथम द्वितीयात्मकखंड) प्रथमभाग.... .... २—०

संस्कृतारोहण—पं० ज्वालाप्रसादजी मिश्रकृत भाषाटीका यह यह छोटासा पुस्तक वाक्यरचनामें सर्वोत्तम है विद्यार्थियोंको अवश्य लेने योग्यहे. .... ०—६

संस्कृतप्रवेशिका—भाषाटीकासहित । यह भी विद्यार्थियोंको लाभ-दायकहै. ... . ०—१॥

संस्कृतशिक्षामञ्जरी—नूतन विद्यार्थी इसे अवश्य संग्रह करें .... ०—१॥

संस्कृतशीघ्रबोधिनी—इस ग्रन्थसे संस्कृतका बोध जल्दी होताहै..... ०—१२

हिन्दीभाषाव्याकरण—(प्रथमभाग) व्याकरणही भाषाका मुख है । शुद्ध बोलना और लिखना व्याकरणहीके द्वारा आता है । यह सरल और उपयोगी ६०० नियमोंमें पं० बनवारीलाल पचौरी-जीने निर्माण किया है. ... . ०—

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास,

"श्रीवेंकटेश्वर" स्टीम प्रेस मुम्बई.